काश्मीर-संस्कृतग्रन्थावलिः

ग्रन्थाङ्कः १३

षट्त्रिंशत्तत्त्वसंदोहः

काश्मीर-श्रीनगर

KASHMIR SERIES OF TEXTS AND STUDIES.

No. XIII.

THE

SHAṬH TRIMSHAT TATTVA SANDOHA

WITH COMMENTARY

BY

RĀJĀNAKA ĀNANDA.

EDITED WITH NOTES

BY

MAHĀMAHOPĀDHYĀYA PAṆḌIT MUKUNDA RĀMA SHÂSTRÎ,
OFFICER-IN-CHARGE RESEARCH DEPARTMENT,
JAMMU AND KASHMIR STATE,
SRINAGAR.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT
OF HIS HIGHNESS LIEUT.-GENERAL MAHĀRĀJA
SIR PRATĀP SINGH SĀHIB BAHĀDUR,
G. C. S. I., G. C. I. E.,
MAHĀRĀJA OF JAMMU AND KASHMIR STATE.

THE RESEARCH DEPARTMENT JAMMU & KASHMIR STATE

BOMBAY:
PRINTED AT THE "TATVA-VIVECHAKA" PRESS.
1918.

श्रीमच्छ्रीकण्ठनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेश्यान्
देशेऽप्यस्मिन्नदृष्टो घुसृणविसरवत्स्तान्मुदे सज्जनानाम् ॥ १ ॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुत्प्लवदायिनम् ॥ २ ॥

ॐ

काश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १३

षट्त्रिंशत्तत्त्वसंदोहः

श्रीमद्राजानकानन्दविरचितविवरणोपेतः

श्रीभारतधर्ममार्तण्ड-कश्मीरमहाराज-
श्रीप्रतापसिंहवर-प्रतिष्ठापिते
प्रत्नविद्याप्रकाश-(रिसर्च) कार्यालये
तदध्यक्ष-महामहोपाध्याय-पण्डित-मुकुन्दराम-शास्त्रिणा
उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन

संगृह्य, संशोधन-पर्यायाङ्कन-विवरणादिसंस्करणोत्तरं
पाश्चात्यविद्वत्परिषत्संमताधुनिकसुगमशुद्धरीत्युपन्यासादिसंस्कारैः परिष्कृत्य
मुम्बय्यां
तत्त्वविवेचकाख्य-मुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीतः

संवत् १९७५ खैस्ताब्दः १९१८

काश्मीर-श्रीनगर

Printed by
Bhiwaji Hari Shinde at the "Tatva-Vivechaka" Press,
Nos. 1, 2, 3, Khetwadi Back Road, Bombay;
and Published by
the Research Department, Srinagar, Kashmir.

ओं नमोऽद्वैतसंविद्वपुषे क्षित्यादितत्त्वात्मने शंकराय ।

अथ

षट्त्रिंशत्तत्त्वसंदोहः

स्पन्द ॥ श्रीमद्राजानकानन्दविरचितविवरणोपेतः

यदयमनुत्तरमूर्ति-
निजेच्छयाखिलमिदं जगत्स्रष्टुम् ।
पस्पन्दे स स्पन्दः
प्रथमः शिवतत्त्वमुच्यते तज्ज्ञैः ॥१॥

इह हि स्वतन्त्रशिवाद्वयदर्शने परमेश्वरः स्वतन्त्रश्चिद्घनसंवित्स्वभावः स्वया स्वातन्त्र्याख्यया शक्त्या सततं शिवादिधरण्यन्ततत्तद्भुवनभूततत्त्वात्मना क्रीडनादिशीलत्वात् कृत्यपञ्चकविधायी, वस्तुतः क्रमराहित्येऽपि विश्वसृष्टौ आभासनमात्रसारेण पारमार्थिककार्यकारणभावेन क्रममपि उद्भावयन्, अनाख्यत्वेऽपि स्वेच्छयैव स्वात्मभित्तौ तत्तच्छिवादितत्त्वाभिख्याम् अवभासयति । तथात्वेऽपि षट्त्रिंशत्तत्त्व-

मयकुलस्वरूपपरामर्शनात् आखण्ड्येन विश्वभरितां स्वचमत्कारविमर्शसाराम् अनुत्तरानन्दघनावस्थां नोज्झति, इति वास्तवाशयाववोधनाय कश्चिन्महामाहेश्वरः परमेशशक्तिपातानुगृहीतः तत्त्वक्रमप्रक्रियाम् आर्याभिरेकविंशत्या समुपनिबबन्ध, – यदयमित्यादिना ।

अनुत्तरमूर्तेर्भगवतः परमेश्वरस्य प्रकाशघनस्वात्मैकात्म्येन अवस्थितं विश्वं सिसृक्षोः दर्पणनगरवत् स्वेच्छयैव स्वात्मनि आद्या प्रोन्मिमीलयिषावस्था शिवतत्त्वव्यपदेश्या पञ्चशक्तिनिर्भरत्वात् स्वातन्त्र्यात् चिदादिप्राधान्येन क्रमशः शुद्धाध्वनि तत्त्वसृष्ट्यवभासनम्, मायाविद्यादेः संवित्प्रकाशघनपरमशिवात् व्यतिरेकानतिरेकविकल्पैरुपहतत्वात् स्वातन्त्र्यमेव केवलं विश्वोत्पत्तिसंहरणादौ मूर्धाभिषिक्तं – तत्तदनन्तशक्तिनिचयानां क्रोडीकारित्वात्, वक्ष्यमाणेऽपि तत्तद्रूपोपग्रहणे स्वातन्त्र्याप्रमुक्तत्वान्न प्राच्यस्वभावापायः ॥ १ ॥

प्रवाह वाली ।

इच्छा सैव स्वच्छा
संततसमवायिनी सती शक्तिः ।
सचराचरस्य जगतो
बीजं निखिलस्य निजनिलीनस्य ॥२॥

तस्य स्वाभिन्ना स्वतन्त्रेच्छाशक्तिरेव उद्भविष्यतो विश्वस्य स्वान्तर्निलीनत्वात् बीजभूता शक्तितत्त्वतां याति, शक्तेः शक्तिमद्धर्मत्वेऽपि न अन्यदर्शनाभिमतवत् तस्मात् व्यतिरेकः, नैष्कर्म्येण अत्र इच्छायाः स्वच्छत्वात् हृदय-विमर्श-सारोर्मि-प्रभृतिभिः संज्ञाभिः तत्तद्दर्शनेषु अभिधानम् । परमेश्वर एव हि स्वैश्वर्योच्छलत्तया पूर्णाहन्ताचमत्कारतारतम्येन शक्तिदशामधिशेते, इत्यत्र आनन्दशक्तिप्राधान्यम् ॥ २ ॥

स्वेच्छाशक्त्युद्गीर्णं
जगदात्मतया समाच्छाद्य ।
निवसन्स एव निखिला-
नुग्रहनिरतः सदाशिवोऽभिहितः ॥३॥

तस्यैव परमेश्वरस्य स्वस्वातन्त्र्योद्भासितस्य विश्वस्य विशुद्धसंविन्मात्राधिकरण्येन स्वात्मन्येव समुल्लासनात् सदित्याख्यानात् सदाशिवतत्त्वावस्था, तत्र प्रोन्मीलितमात्रचित्रकल्पतया इदमंशस्य अस्फुटत्वात् इच्छाप्राधान्यम्, अतः स भाविनः समस्तभावराशेः सम्यक् बहिरवविभासयिषालक्षणक्रीडारसिकत्वात् अनुग्रहनिरतस्तद्भूमिकां गृह्णाति इत्यतो निवसन्नित्युक्तम् ॥ ३ ॥

विश्वं पश्चात्पश्यन्-
इदन्तया निखिलमीश्वरो जातः ।
सा भवति शुद्धविद्या
येदन्ताहन्तयोरभेदमतिः ॥ ४ ॥

एवं क्रमावभासनात् विश्वस्य शुद्धसंविन्मात्राधिकरण एव स्फुटतया परामृश्यमानस्य अहमंशेऽभिषेचनात् स एव परमेश्वरः ईश्वरतत्त्वदशामधिश्रयति, अत्र वेद्यजातस्य स्फुटावभासनात् ज्ञानशक्त्युद्रेकः । आन्तरदशाया उद्रिक्तत्वात् सदाशिवावस्था, बहिर्भावपरतोद्रेकात् तु ईश्वरावस्था इत्यनयोर्विशेषः । प्ररूढभेदस्य इदन्तांशस्य समधृततुलापुटन्यायेन अहमंशस्फुरणायां शुद्धविद्यातत्त्वम् । अत्र विश्वस्य स्फुटतरं परामर्शनात् क्रियाशक्तिः प्रधाना । इयति च शुद्धस्वातन्त्र्यमेव तत्तद्वैचित्र्येण प्रस्फुरति, इति शुद्धोऽध्वा ॥ ४ ॥

माया विभेदबुद्धि-
र्निजांशजातेषु निखिलजीवेषु ।
नित्यं तस्य निरङ्कुश-
विभवं वेलेव वारिधे रुन्धे ॥ ५ ॥

अशुद्धे पुनरध्वनि परमेश्वर एव स्वात्मप्रच्छादनक्रीडया अघोरभट्टारकभूमिं मन्त्रमहेश्वररूपां गृहीत्वा दुर्घटसंपादनसामर्थ्येन मायाशक्त्या स्वतोऽन्योन्यतश्च भिन्नम् अणूनां भोगसिद्ध्ये कलादिक्षित्यन्तं जडाजडवर्गं क्रमतोऽक्रमतोऽपि अवभासयति, तत्र भिन्नभिन्नप्रथात्मकमायीयमलेन स्वाङ्गकल्पेष्वपि जडवेद्यवर्गेषु विभिन्नतया बुद्धिरेव मायाख्यं तत्त्वं, येन तस्य निरर्गलं स्वातन्त्र्यं प्रतिहन्यते, वेलयेव अब्धितरङ्गाणां वैभवम् ॥ ९ ॥

स तया परिमितमूर्तिः
संकुचितसमस्तशक्तिरेष पुमान् ।
रविरिव संध्यारक्तः
संहृतशक्तिः स्वभासनेऽप्यपटुः ॥६॥

अविकार्यस्यापि तस्य चिदात्मनः स्वशक्तीनां संकोचनपुरःसरं शक्तिदारिद्र्यमापन्नस्य अण्वपरपर्याया पुरुषसंज्ञा, संहृतशक्तित्वेन परिमितात्मा स स्वात्मैश्वर्यमपि प्रत्यभिज्ञातुमपटुः संचरति विचित्रयोनिषु । यदा पुनः शक्तिपाततारतम्यात् विद्याभिज्ञापितैश्वर्यः स्वाङ्गकल्पमेव विश्वं प्रत्यभिजानीयात् तदा जीवच्छिवभावं प्रत्यापद्यते ॥ ६ ॥

संपूर्णकर्तृताद्या
बह्वयः सन्त्यस्य शक्तयस्तस्य ।
संकोचात्संकुचिताः
कलादिरूपेण रूढयन्त्येवम् ॥ ७ ॥

शक्त्यन्तरक्रोडीकारिण्या स्वातन्त्र्यशक्त्यावियुक्तत्वादेव परमेश्वरस्य बहुशक्तित्वं, संकोचग्रहणादेव सर्वास्तच्छक्तयः संकुचितीभूय कलादितत्त्वपञ्चकेन प्ररोहमुपगच्छन्ति । ता यथा—सर्वकर्तृता सर्वज्ञता तृप्तिः नित्यता स्वातन्त्र्यमिति, एतत्पञ्चकं शुद्धाशुद्धभेदेन द्विधा,—परमेशविषयतया शुद्धं, संसारविषयतया तु अशुद्धम् ॥ ७ ॥

तत्सर्वकर्तृता सा
संकुचिता कतिपयार्थमात्रपरा ।
किंचित्कर्तारममुं
कलयन्ती कीर्त्यते कला नाम ॥८॥

गोपितस्वरूपत्वान्निरुद्धशक्तेः परमेश्वरस्य सर्वकर्तृताशक्तिः प्राणादिपरिमितप्रमातृभावे किंचित्कर्तृतोद्दलनात्मना

कलनेन अधःप्रक्षेपात् कलातत्त्वात्मतां याति, यद्वशात् किंचिदेव कर्तुमुत्सहतेऽणुः न सर्वत्र कर्तृत्वमिति ॥ ८ ॥

सर्वज्ञतास्य शक्तिः
परिमिततनुरल्पवेद्यमात्रपरा ।
ज्ञानमुत्पादयन्ती
विद्येति निगद्यते बुधैराद्यैः ॥ ९ ॥

एवं तस्यैव सर्वज्ञताशक्तिः संकोचं गृहीतवती किंचिज्ज्ञेयमात्रपरत्वेन ज्ञानोत्पादनात् विद्यातत्त्वं, विद्ययैव बुद्धिदर्पणे प्रतिफलिता भावा विविच्यन्ते – गुणसंकीर्णतया तस्या विवेक्तुमक्षमत्वात्, तस्मात् विद्ययैव अर्थविवेकः ॥ ९ ॥

नित्यपरिपूर्णतृप्तिः
शक्तिस्तस्यैव परिमिता तु सती ।
भोगेषु रञ्जयन्ती
सततममुं रागतत्त्वतां याता ॥ १० ॥

परमेश्वरस्य नित्यपरिपूर्णतृप्तिर्नाम शक्तिः पारिमित्यं याता यत्र क्वचन उपादेयाद्यभिमते 'किंचिन्मे भूयात्' इति

सामान्येनाभिष्वङ्गमात्रादापद्यते रागतत्त्वम् । विशेषाभिष्वङ्गस्तु अस्यैव पल्लवितप्राय इति एतदेव कलाविद्ययोः प्रागुक्तयोः किंचिद्रागे निमित्तम् ॥ १० ॥

सा नित्यतास्य शक्ति-
निंकृष्य निधनोदयप्रदानेन ।
नियतपरिच्छेदकरी
कॢप्ता स्यात्कालतत्त्वरूपेण ॥ ११ ॥

अकालकलितस्य चिदात्मनो नित्यत्वाख्या शक्तिः न्यग्भावमाश्रित्य कार्यारूषितकर्तृत्वकलनया अणुं तुट्यादिक्रमाभासनात्मना कालेन संयोज्य कालतत्त्वव्यपदेश्या कल्प्यते, येन अयमणुः भूतादिक्रियाक्रमकलितः कालवशतामापद्यते ॥ ११ ॥

यास्य स्वतन्त्रताख्या
शक्तिः संकोचशालिनी सैव ।
कृत्याकृत्येष्ववशं
नियतममुं नियमयन्त्यभून्नियतिः ॥१२॥

स्वातन्त्र्यमेव अस्य परप्रमातुः संकुचत् नियतितत्त्वतामाभासयति, यतः कार्याकार्येषु नियमाधानात् विशिष्टे कार्ये विशिष्टं कारणमेव आदध्यान्नानियतमिति। एतेन कलादिना कञ्चुकेन आवृतोऽयं शक्तिदारिद्र्यमनुभूय कलादिमुखेनैव स्ववैभवात् प्रतिवितीर्णकिंचिदंशः पशुरित्युच्यते ॥ १२ ॥

इच्छादित्रिसमष्टिः
शक्तिः शान्तास्य संकुचद्रूपा ।
संकलितेच्छाद्यात्मक-
सत्त्वादिकसाम्यरूपिणी तु सती ॥१३॥

बुद्ध्यादिसामरस्य-
स्वरूपचित्तात्मिका मता प्रकृतिः ।
इच्छास्य रजोरूपा-
हंकृतिरासीदहंप्रतीतिकरी ॥ १४ ॥

अस्य शान्ताख्या शक्तिरक्षुब्धत्वात् इच्छादीनां शक्तीनां गर्भीकरणात् समष्टिरूपा, पारिमित्यग्रहणाच्च गुणानामविभागावस्था प्रकृतितत्त्वम्। गुणानामिच्छादिशक्तित्रिकेन अ-

न्वारब्धत्वात् त्रित्वं – यत्प्रक्षोभात् प्राकृतिकसर्गस्य प्रसरः। तत्र चित्तात्मके बुद्ध्यहंकृन्मनांसि साम्यावस्थामधिश्रयन्ति। अत्र तत्त्वक्रमप्रसरे शिवादिसकलान्तेषु प्रमातृवर्गेषु ज्ञानक्रियाशक्ती एव मुख्यमुपकरणं, ते एव संकुचद्रूपे ईश्वर-शुद्धविद्ये, संकुचिते विद्याकले, अत्यन्तं संकुचिते बुद्धिकर्मेन्द्रियाणि, क्रियायाः संकोचसीम्नि भूतसूक्ष्मादि इति विज्ञेयम्। अणोः रजःपरिणामिणी इच्छाशक्तिः अहमित्यभिमानलक्षणा अहंकृतिः ॥ १३–१४ ॥

ज्ञानापि सत्त्वरूपा
　　निर्णयबोधस्य कारणं बुद्धिः।
तस्य क्रिया तमोमय-
　　मूर्तिर्मन उच्यते विकल्पकरी ॥१५॥

सत्त्वपरिणामिनी ज्ञानशक्तिरेव अर्थाध्यवसायलक्षणा बुद्धिः। तमःपरिणामिनी क्रियाशक्तिः। विकल्पकरणलक्षणं मनस्तत्त्वमुच्यते ॥ १५ ॥

वामादिपञ्चभेदः
　　स एव संकुचितविग्रहो देवः।

ज्ञानक्रियोपराग-
प्राधान्याद्विविधविषयरूपोऽभूत् ॥१६॥

स एव क्रीडादिसतत्त्वो वामदेवादिपञ्चमूर्तित्वात् संकुचितो भूत्वा ज्ञानशक्त्युपरञ्जनप्रधानतया ज्ञानेन्द्रियतद्विषयशरीरतां, क्रियाशक्त्युपाधिप्राधान्यात् कर्मेन्द्रियव्यापारवत्त्वं च उपादत्ते । शक्तिपञ्चकोपादानात् करणानां पञ्चधात्वं बोध्यम् ॥ १६ ॥

श्रोत्रं चक्षुः स्पर्शन-
जिह्वा-घ्राणानि बोधकरणानि ।
शब्द-स्पर्शौ रूपं
रस-गन्धौ चेति भूतसूक्ष्माणि ॥ १७ ॥

श्रोत्रादीनि ज्ञानेन्द्रियाणि, शब्दादीनि तन्मात्राणि ॥१७

अयमेवातिनिकृष्टो
जातो भूतात्मनापि भूतेशः ।

गगनमनिलश्च तेजः
सलिलं भूमिश्च पञ्चभूतानि ॥१८॥

अत्यन्तसंकोचग्रहणात् अचिद्रूपतामवभास्य आकाशादीनि पञ्चभूतानि ॥ १८ ॥

श्रोत्रादिकरणवेद्याः
शब्दाद्यास्तानि वेदकान्येषाम् ।
वचनकरी वागासीत्
पाणिः स्यात्करणभूत आदाने ॥ १९ ॥

शब्दादिज्ञानसाधनानि श्रोत्रादिकरणानि, वचनादिक्रियासाधनानि वागादीनि कर्मेन्द्रियाणि ॥ १९ ॥

गमन-विसर्गानन्द-
त्रितये पादादिकं करणम् ।
गन्धवती भूमिः स्या-
दापः सांसिद्धिकद्रवास्तेजः ॥ २० ॥

उष्णस्पर्शमरूप-
स्पर्शौ वायुरम्बरं सशब्दम् ।
षट्त्रिंशत्तत्त्वमयं
वन्दे कौलं कुलातिगं शंभुम् ॥२१॥

आदिना पायूपस्थौ गृह्येते । गन्धवत्त्वं भूमेर्लक्षणम्, सांसिद्धिकद्रवत्वमब्लक्षणम्, उष्णस्पर्शेन तेजो लक्ष्यते, अरूपस्पर्शौ वायुलक्षणम्, शब्द आकाशस्य इति प्रत्येकं मुख्यगुणनिर्देशः । तत्त्वानामुत्तरोत्तरं व्याप्य-व्यापकभावेन भूमिर्व्याप्या जलादिशिवान्तं व्यापकानि पञ्चत्रिंशत्, एवं भूतसृष्टौ भूमौ व्योमादिगुणा व्यापकत्वेन अनुगताः सन्ति । परमशिवतत्त्वस्य सर्वत्र अनुगतत्वात् विश्वमयतदुत्तीर्णयामलकौलस्वरूपमेव भक्तानां समावेशार्हम्, इति वन्दनोपसंहारोक्त्या उपक्षिप्तम् इति शिवम् ॥

इति षट्त्रिंशत्तत्त्वसंदोहः श्रीमद्राजानकानन्दाचार्य-
विरचितविवरणोपेतः समाप्तः ॥

सद्विद्यानां संश्रये ग्रन्थविद्वद्-
व्यूहे ह्रासं कालवृत्त्योपयाते ।
तत्तत्सद्धर्मोद्दिधीर्षैकतान-
सत्प्रेक्षौजःशालिना कर्मवृत्त्यै ॥ १ ॥

श्रीमत्कश्मीराधिराजेन मुख्यै-
र्धर्मोद्युक्तैर्मन्त्रिभिः स्वैर्विवेच्य ।
प्रत्यष्ठापि ज्ञानविज्ञानगर्भ-
ग्रन्थोद्धृत्यै मुख्यकार्यालयो यः ॥ २ ॥

तत्राजीवं निर्विशद्भिर्मुकुन्द-
रामाध्यक्षत्वाश्रितैः सद्भिरेषः ।
पूर्त्या शुद्ध्या व्याख्यया संस्कृतः स्तात्
पूर्णो ग्रन्थः श्रेयसे सज्जनानाम् ॥ ३ ॥

तिलकम् ॥

श्रीशिवार्पणं भूयात् ॥

THE KASHMIR SERIES
OF
TEXTS AND STUDIES.

KASHMIR SERIES OF TEXTS AND STUDIES.
No. XIV.

THE BHĀVOPAHĀRA

OF

CHAKRAPĀṆI NĀTHA

WITH COMMENTARY

BY

RAMYA DEVA BHAṬṬA.

EDITED WITH NOTES

BY

MAHĀMAHOPĀDHYĀYA PAṆḌIT MUKUNDA RĀMA SHÂSTRÎ,
OFFICER-IN-CHARGE RESEARCH DEPARTMENT,
JAMMU AND KASHMIR STATE,
SRINAGAR.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT
OF HIS HIGHNESS LIEUT.-GENERAL MAHĀRĀJA
SIR PRATĀP SINGH SĀHIB BAHĀDUR,
G. C. S. I., G. C. I. E.,
MAHĀRĀJA OF JAMMU AND KASHMIR STATE.

BOMBAY:
PRINTED AT THE "TATVA-VIVECHAKA" PRESS.
1918.

श्रीमच्छ्रीकण्ठनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेश्यान्
देशेऽप्यस्मिन्नदृष्टो घुसृणविसरवत्स्तान्मुदे सज्जनानाम् ॥ १ ॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुत्प्लवदायिनम् ॥ २ ॥

ॐ

काश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १४

भावोपहारः

श्रीमच्चक्रपाणिनाथविरचितः

श्रीमदाचार्य—भट्टरम्यदेवविरचितविवरणोपेतः

श्रीभारतधर्ममार्तण्ड-कश्मीरमहाराज-

श्रीप्रतापसिंहवर-प्रतिष्ठापिते

प्रत्नविद्याप्रकाश-(रिसर्च) कार्यालये

तदध्यक्ष-महामहोपाध्याय-पण्डित-मुकुन्दराम-शास्त्रिणा

उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन

संगृह्य, संशोधन-पर्यायाङ्कन-विवरणादिसंस्करणोत्तरं

पाश्चात्यविद्वत्परिषत्संमताधुनिकसुगमशुद्धरीत्युपन्यासादिसंस्कारैः परिष्कृत्य

मुम्बय्यां

तत्त्वविवेचकाख्य-मुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीतः

THE RESEARCH DEPARTMENT JAMMU & KASHMIR STATE

संवत् १९७५ खैस्ताब्दः १९१८

काश्मीर-श्रीनगर

Printed by
Bhiwaji Hari Shinde at the "Tatva-Vivechaka" Press,
Nos. 1, 2, 3, Khetwadi Back Road, Bombay;
and Published by
the Research Department, Srinagar, Kashmir.

ओं नमोऽनन्तशक्तये शिवाय ।

अथ

भावोपहारः

श्रीमच्चक्रपाणिनाथविरचितः

श्रीभट्टज्योग्देवात्मजभट्टरम्यदेवाचार्यविरचितविवरणोपेतः ।

स्वविमर्शविकचकानन-
समुन्मिषद्विषयकुसुमसंतत्या ।
करणेश्वरीभिरभितः
समर्चितो बोधभैरवो जयति ॥ १ ॥

विमर्शमय्या निजशक्तिदेव्या
विश्वप्रथाभैरवकॢप्तपूजः ।
जयत्यकाम्नोदितरश्मिरूप-
स्वशक्तिपुञ्जात्मजचक्रनाथः ॥ २ ॥

क्रमाक्रमक्रियाक्रान्ति-
व्यतिक्रमनिकृन्तनम् ।
देवं चक्रं श्रये क्रीडा-
क्रोडीकृतकृतान्तकम् ॥ ३ ॥

पं० ८ ख० पु० पुञ्जाकरेति पाठः ।

इह हि निरुत्तरनिर्निकेतनावटविटङ्कसंकलित-सकलकलनाकुलं परमभैरवचक्रेश्वरसतत्त्वमवाच्य-वाचकमवर्णनिर्वर्णनमनाद्यनन्तमन्तर्बहीरूपमपू-ज्यपूजकमपि प्रसरदाद्योद्यन्तृतावतारक्रमावता-रितपञ्चवाहप्रपञ्चमयाकृत्रिमपूज्यपूजकक्रमेण प्रो-त्स्फुरति इति रीतिरविगीतसुखसंप्रदायसरणि-समनुगतसर्वागमान्तरघुमघुमायमानश्रीविज्ञान-भैरवादिषु स्वकण्ठेनैव भगवता निर्णीता, श्रीस्व-तन्त्रभट्टारकादिषु च 'अकृत्वा मानसं यागम्' इत्या-दिवाक्यैर्ध्वनिता मानसयागातिरेकिणी सर्वभा-वोपहृतिः, तामेव भट्टारकपादाः स्तोत्रमुखेन प्रकटयन्त आदिश्लोकेन आसूत्रयन्ति

ओं नमः सूर्यकलाजाल-
कालदेहापहारिणे ।

पं० १ ख० पु० निर्निकेतसंकेतावटेति पाठः ।

पं० २ ख० पु० कुलपरभैरवेश्वरेति पाठः ।

पं० ६ ख० पु० रवगीति इति पाठः ।

आधाराधेयपीठाय
भवायाभवदायिने ॥ १ ॥

भवाय हेलामात्रोद्भावितभवाभवाय नमः । नम इति नमः-शब्दगतवर्णद्वयवित्यासेन चतुर्थ्यन्तपदावेदिततत्स्वरूपसर्वावेदननयेन उन्मनीभावः तत्समाविष्टेन सूचितः, तेन तत्र मनो विलापयामि इत्यर्थः । कालदेहं वा कालविकल्पनोल्लासिकामीहां वा सूर्यकलाजालेन द्वादशात्मकमरीचिचयेन योऽपहरतीति तच्छीलोऽयमक्रमपदेन दर्शितः, सूरीनामकलाजालेन मध्यमधामानुवेधेन भावाभावभूम्युल्लङ्घनात्मना कालदेहापहारी महाहङ्कारात्मकमहाकालदेहमपहर्तुं शीलं यस्य स तथोक्तः । तदुक्तं

'कालीं महाकालमलंग्रसन्तीम्'

इत्यादि । ततश्च सूर्यकलाजालेन वा सूर्यकलाजालमेव वा कालदेहमपहरति इति अलंग्रासम-

पं० १२ ख० पु० देहाहंकारेति पाठः ।

हौघः प्रकटितः, न ह्यक्रमानाख्यपरचिच्चक्रेश्वरी-समुदये कालो नाम कश्चित् उपपद्यते । तदुक्तं मयैवाक्रमकल्लोलकारिकासु

'कालः कालेन काल्यश्चेत्कालः काल्येत केन वा ।
अकाल्य एव कालश्चेत्काल्य एव तथा न किम् ॥
मृत्युः स्फुरत्प्रकाशान्तर्निगीर्णो निगिरेत्कथम् ।
अस्फुरन्नप्रकाशत्वान्नान्तर्ग्राह्योऽथ वा न किम् ॥'

इति । तथा आधाराधेयौ षडध्वतदुत्तीर्णरूपौ भवाभवौ तत्स्थस्यैवास्य, उद्योगावभासचर्वणविलापनतदुत्तरकृत्ययोगात् पीठ इव पीठो यस्य 'आधारध्येयपीठाय' इति तु पाठे आधारे ध्येया शक्तिरेव तदधिष्ठानेन साधिष्ठानत्वात् पीठो यस्य तस्मै भवाय, अभवदायिने अशिवपरिखण्डनाय मोक्षप्रदाय वा नमः इत्यनेन कालदेहापहारिणा आधाराधेयपीठत्वप्रतिपादनेन सर्वात्मसात्करण-लक्षणः सततोदितोऽकृत्रिमपूजानय उट्टङ्कितः । अत्र अपहारिपदेन संहार उक्तः, पीठपदेन स्थितिक्रमो, भवपदेन सृष्टिः, इत्यक्रमौघः सृष्टिपर्यव-

सानेन अनेन श्लोकेन चर्चितः। चतुर्थस्य सकलक्रमाक्रमभित्तिभूतत्वात् पृथक् अनभिधानमेव ॥ १ ॥

अथ स्थितिप्रधानसृष्टिसंहारपरिघट्टनेन द्वितीयं पूजाक्रमं दर्शयति

नमः शिशुनिशाकान्त-
कलाकमलमालिने ।
परमानन्ददेहाय
शिवायाव्यक्तमूर्तये ॥ २ ॥

अव्यक्ता भवाभवस्थितिप्राधान्यात् उट्टङ्कत्वेन अप्रकटिता मूर्तिर्यस्य तस्मै शिवाय महत्यावेशेऽपि अपरिभ्रंशशीलाय। नम इति व्याख्यातम्। शिशुतया आद्या भेदस्वभावेन स्थिता या इयं निशाकान्तस्य कालरात्रीरमणस्य परभैरवस्य कलनात् कला सैव अघोरघोराघोरातिघोरावर-

पं० १० ख० पु० अटङ्कत्वेनेति पाठः।
पं० १३ क० पु० आद्योद्भवस्वभावेनेति पाठः।

णत्रयोपेतवर्गाष्टकदललालिता, सैव कमलं तन्मालिने तदाधाराय तदाधेयाय वा। निशाकान्तकला संहारदेवी, तथा चास्मत्पुत्रः

'शिव शिवासनमूर्ध्नि सदा स्थिता
विगतकालकलाकलनाक्रमा।
कृशतया कृशिमन्यपलापिनी
जयति कापि कला विगतक्रमा॥'

इति। वाजसनेयभट्टारिकायामपि

'अवधूता निराचारा सर्वभूतान्तरे स्थिता।
क्रीडत्यात्ममयैर्भावैर्बालः क्रीडनकैरिव॥
प्रबुद्धपूर्णभावाभ्यां विभज्यात्मानमात्मना।
अप्रबुद्धप्रबुद्धेन क्रीडार्थं भावयेद्भृशम्॥'

इति। मालिने धारिणे इति स्थितिः। आनन्ददेहाय इति सृष्टिः तस्या आनन्दरूपत्वात्, अव्यक्तमूर्तये इति संहारः। अयमपि सततसिद्ध एव पूजाक्रमः॥ २॥

पं० १ ख० पु० लालितमिति पाठः।
पं० ९ ख० पु० भावान्तरस्थिता इति।
पं० १२ ख० पु० भावयेत्स्वयमिति पाठः।

अथ गुणीभूतसृष्टिस्थितिरूपतृतीयचक्राक्रमपूजां प्रतिजानीते

नमः पाशौघसंघट्ट-
लयविश्लेषकारिणे ।
मन्त्रगर्भोदरस्थाय
हराय परमात्मने ॥ ३ ॥

पाशानाम्—आणवमायीयकार्मिकाणां मलानामोघः तस्य संघट्टः अहेतुकेन केनापि क्रमेण उल्लासः, तेन वा तत्र वा तस्य वा योऽयं लयः, तथा विश्लेषः पृथग्भावस्तत्करणशीलत्वेन वर्तमानाय सदा त्रितयकारित्वान्नान्तरीयकं तिरोधानानुग्रहकारित्वं ध्वनितम् । मन्त्रगर्भोदरस्थाय इत्यत्र त्रिधा गुर्वाम्नायः — मन्त्रा वर्णरूपा गर्भे यस्याः सा मालिनी मन्त्रगर्भा तदन्तर्गता तस्या उदरे वाच्यत्वेन अभ्यन्तरे तिष्ठति इति स तथा, अथ वा मन्त्राणां गर्भो मन्त्रगर्भः तदन्तर्गतः प्रथमस्वरः

तस्य उदरम् उत्तरपक्षप्रतिक्षेपेण मध्यमकला तुट्य-र्धरूपा तत्र स्थिता, अथ वा मननत्राणधर्मित्वात् मरीचिषु स्थित्युदितासु मन्त्र इत्यादिरूपतया योऽयम् अनारावरावो रावसंघट्टकतया

'त्वामजामकृतपञ्चकारण-
द्रावणोड्डमरधामभैरवीम् ।
स्तौम्यनाहतहतव्यतिक्रम-
स्फाररावकृतवीरघट्टनाम् ॥'

इत्याद्यस्मद्विरचिताकुलकौलिकात्रिंशिकोक्तस्व-रूपः तस्य गर्भे गहनम् अवटरूपं तदुदरे तद्गमनि-काम्ये धाम्नि तिष्ठति इति स तथोक्तः, सर्वत्र चात्र आद्यभट्टारकोपदेश एव विराजते तस्यैव परमात्मत्वात्, अत एवात्र भव-शिव-हर-शब्दैः श्लोकत्रयोदितसृष्ट्याद्युपदेशचरमस्य अनाख्यस्य सर्वान्तश्चारित्वमवाग्गोचरत्वात् सूचितमेव । अत्र ओघसंघट्टशब्दाभ्यां सृष्टिस्थित्योः, हरश-ब्देन संहारस्य द्योतनेऽकृतका कापि पूजा निरू-पितैव ॥ ३ ॥

पं० १ ख० पु० तुटिरूपेति पाठः ।

तदेवमनवच्छिन्नसततसिद्धनिरुपादानानन्तानव धिकस्वरूपभूतपूजासंभवे शम्भोर्निर्गुणस्य अनन्तगुणस्य वोपचारैरान्तरैर्बाह्यैर्वा कायिकैर्वाचिकैर्मानसैर्वा पूजयितुमशक्यत्वात् कोऽयं भावोपहारो नाम इत्याशङ्क्याह

यद्यपि त्वं गुणातीतो
वाक्पतेरप्यगोचरः ।
तथाप्या हृदयात्स्तोतु-
मुद्यता वाक्सदा मम ॥ ४ ॥

अतिभक्तिरसावेश-
विवशा विश्वतो मुख ।
त्वत्प्रेरिता यतो नाथ
नापराधोऽस्ति मे क्वचित् ॥५॥

यद्यपि-तथापि-शब्दाभ्यामनुपपत्तावपि उपपत्तिं प्रकाशयद्भ्यामनुपपत्तिरेव सर्वोपपत्तिरिति

2

कापि युक्तिरुक्ता, तथाहि गुणातीतोऽपि तस्यैव विषयोऽपि तदुल्लासितेन केनापि दुर्घटघटनानयेनार्वाचीनभूमिमूर्तित्वेन विषयधाम अश्नुते। तदुक्तं तपस्विप्रबोधनाथेन

'परतरतयापि रूपं
यद्यत्कलयामि तत्तदधरं ते।
अधरतरापि न कलना
सा काचिद्यत्र न स्थितास्यभितः॥'

इति। आ हृदयात् आ परधाम्नः पश्यन्त्यादिरूपेण सदोदितापि वैखर्यात्मना त्वयैव एतेन आद्यभट्टारकेण प्रकर्षेण ईरिता सती प्रसरति, इति मम न कश्चित् अपराध इत्यहं तत्समावेशित एवोदितः, यदि अहं नाम कश्चित् अन्यो भवेयं, भवेत् नाम अपराधो, यदि परमपराधोऽपि अहमपि भवानपि एकमेव तत्त्वं, ततश्च कोऽपराधशब्दार्थः। तदुक्तं मयैव शिवस्वस्तोत्रे

'अथ वा हृदम्बरगतेन
जनिनिधनहीनमूर्तिना।

पं० ३ ख० पु० भूमिवर्तित्वेनेति पाठः।

चन्द्रविमलमुकुटेन नुता-
वनुमोदिता मम मतिः प्रवर्तते ॥'

इति। अतिक्रान्ता भक्तिरसाविभागभूमिर्येन तादृक् योऽयमावेशः सर्वतो-दिक्कतन्मयतोदयः तेन विवशा विशिष्टा वशेव करेणुरिव निजबोधरसचर्वणसदावरणनिरावरणमदविघूर्णितत्वात् विश्वतः सर्वतो मुखानि यस्य स तथा, इत्यनेन एतदुक्तं भवति—न तत् वाच्यं कृत्यं वा किञ्चन यत् त्वत्परिचर्वणचारुरूपतया न चकास्ति। ततश्च सुप्तप्रलापगालिदानादिभिरपि त्वमेव स्तूयसे इत्याह 'विश्वतो मुख' इति विश्वत आ मुखम् यस्य इति वा। पशुकुक्कुटादिमूर्तिपर्यन्तमस्य आविर्भूतत्वमबाध्यमित्यर्थः। सर्वथापि अनुदितानस्तमितापरिमितचिदेकघनमिति प्रतिपादितम् ॥ ४ ॥ ५ ॥

त्वत्पादाब्जरजःपूत-
चिताभूतिविभूषितात्।

पं० २ क० पु० ननु मतिः इति पाठः।

गृहाण मत्तः श्रीकण्ठ?
भावपूजामकृत्रिमाम् ॥ ६ ॥

श्रीर्विश्ववैचित्र्यशोभोद्भाविनी शक्तिः कण्ठे अविभागधाम्नि यस्य तस्यामन्त्रणम्, गृहाण इति संप्रदानसंप्रदेयतया त्वमेव स्फुरसि इति याच्ञार्था अकृत्रिमशब्देन सूचिता । तव पादाः पिण्डस्थादिभेदेन चतस्रोऽवस्थाः ता एव अब्जं तत्र तदुल्लासितज्ञेयकार्यवस्तु विकल्परूपं, रञ्जनात् रजः तेन पूता ततो वा पूता सद्युक्तिपरिपवनेन क्षपिता या चिताभूतिः सर्वसंक्षयपरचिद्रूपा सर्वोद्भूतिरूपा वा तया विशिष्टायां भुवि उषितात् प्रस्तोष्यमाणात् मत्तो मम सकाशात् त्वमपि मत्तो निजानन्दनिर्भरो भावपूजाम् आत्मसात्करोषीति ॥ ६ ॥

तामेव स्नानक्रमेण प्रस्तौति

पुष्कर नाम्नी तीर्थ

हृत्पुष्कराख्ये स्नात्वान्त-
स्तीर्थे योगिनिषेविते ।

संबोधधौतवसनः
श्यामकण्ठं यजाम्यहम् ॥७॥

हृत्पुष्करं हृत्पद्मं तत्र बद्धलक्ष्यतया स्नात्वा सकलमलविधूननं विधाय, अथ वा हरतीति हृत् संहारसंहारिणीरूपम्, एतदेव हृत्पुष्करं तीर्थं सर्वचक्राणां तत्रैव परमविश्रान्तिलाभात्, तत्र सर्वविशुद्धिमादाय योगिनोऽत्र परराश्मिरूपाः, सम्यक् बोधः संबोधः तदेव धौतं सकलकालिकाविशुद्धं वसनम् अशेषाच्छादकतया वर्तमानं यस्य, इति सर्वोत्तीर्णसर्वमयतोक्तिः, श्यामकण्ठः सर्वघट्टकमहातामिस्रारूपसंकलनधामात्मिका श्यामा कण्ठे गले यस्य । यथोक्तम्

'पानाशनप्रसाधन-
संभुक्तसमस्तविश्वया शिवया ।
प्रलयोत्सवसरभसया
दृढमुपगूढं शिवं वन्दे ॥' (उ० स्तो० १६-२९)

इति ॥ ७ ॥

अर्घपात्रमाह

प्रभूतभूतसंभूत-
शोणितैरर्घभाजनम् ।
क्रियते ते महाकाल-
कायकंकालकन्दले ॥ ८ ॥

प्रभौ व्यापके भैरवधाम्नि ऊतानि अनुस्यूतानि यानि भूतानि पञ्चात्मकशक्तिविवर्तभूतानि पृथिव्यादीनि, तत्र संभूतानि यानि शोणितानि तत्स्वरूपविगलनसमुदितचिद्रसरूपाणि, तैरर्घभाजनं महाविमर्शमयपूजनपात्रम् एकशक्तिशुक्तिविगलनरूपं सर्वेषामविकल्पभूम्यधिरोहविदारितविकल्पमयमहाकालकलेवरकरङ्ककपाले कालसंकर्षिणीधाममध्ये विधीयते इत्यलं रहस्योद्घाटनेन ॥ ८ ॥

यद्यद्विकल्पनाजालं
बाह्यार्थप्रतिपत्तये ।

तत्तद्द्वाराधिपकुलं
तव पूज्यं मनस्विभिः ॥९॥

बाह्यविषयाक्षेपकत्वात् मनोन्मनालक्षणं द्वारं तद्वासि कुलं द्वाःस्थकुलं द्वाःस्थसमूहः, विकल्परसा एव हि स्वरूपरसावेशद्रवणेन असंविभक्ता बाह्यकक्ष्यासु क्षिपन्ति, तदनु चैवं मानितास्ते स्वरूपनरपतिसमीपमर्पयन्ति, इति स्वशक्तिभागावधानेन पूज्यं स्वीकृतमनस्कैः ॥ ९ ॥

अशेषावरणोन्मुक्त-
गुप्तसौषुप्तमण्डले ।
पूज्यसे नगजाकान्त !
ग्रहणे चन्द्रसूर्ययोः ॥ १० ॥

चमनादबाह्यत्वेन अन्तरेव चिमिचिमायमानत्वात्, द्रवणाच्च बहिर्लोकयात्रात्मना प्रसरणात्, तथा सुष्ठु ऊरणात् इति चन्द्रशब्देन सूर्यशब्देन च जाग्रत्स्वप्नयोर्ग्रहणम्, तयोर्ग्रहणे आत्मसात्क-

पं० ८ ख० पु० शक्तिभावावधानेनेति पाठः ।

रणे सति, अशेषावरणैः सर्वोपाधिभिः, उन्मुक्ते गुप्तसौषुप्तमण्डले गुप्तं तिरोहितं सौषुप्तं मण्डलं यत्र तस्मिन् तुरीये धाम्नि, नगजा अविचलकूटस्थधामसमुल्लसिता शक्तिः तस्याः कान्त? विश्रामधामन्, पूज्यसे सततं संबोधनेनानुभूयसे ॥ १० ॥

हानादानोदयारम्भ-
सदसद्विभ्रमोज्झितम् ।
ज्ञप्तिमात्रप्रतिष्ठान-
मासनं त्रिजगत्पते ॥ ११ ॥

त्यागग्रहोद्गमक्रियाभावाभावविकल्पनिर्मुक्तम् अत एव मातृमानमेयोल्लङ्घनेन प्रमितिमात्रं निर्विशेषेण फलरूपमासनमुपलक्षणतया तस्यापि सापेक्षत्वात् तदपि उल्लङ्घितवतोऽव्यपदेश्यस्य तव, ते निवेद्यत इति पाठे निवेद्यते निःशेषेण वेद्यते तद्भावेन अनुभूयते, त्रिजगतो मातृमानमेयलक्ष-

पं० १६ ख० पु० भावनानुभूयते इति पाठः ।

णस्य अधिष्ठातः! हानादानादिपदार्थषट्कनिर्देश-
त्वानपेक्षमासनं सूचितम् ॥ ११ ॥

मूर्तिदानमनाभास-
शक्तिभासोपबृंहितम् ।
तुर्यपीठप्रतिष्ठानं
वितरामि जगत्पते ॥ १२ ॥

उपबृंहितम् उपबृंहणम्, बाह्यावभासरहितानवच्छिन्नचमत्कारसारशक्त्यवभासरूपं, मूर्तेः मूर्छितसतत्त्वस्य किञ्चिदुच्छूनतात्मनः पारिपूर्ण्योल्लेखस्य दानं, वितरामि विमृशामि, पूर्णाहन्तया च परपदनिविष्टम् ॥ १२ ॥

दिक्कालदेशकलना-
कलङ्कोज्झितचेतसः ।
कः करोति बुधः स्थाणो-
राह्वानादिविसर्जनम् ॥ १३ ॥

स्थाणोः स्थास्नोरप्रचलितसर्वगतचिन्मात्रवपुषः पृथक् दिग्देशकालपरिगणनकल्पनाभावात् आह्वानोपक्रमं विसर्जनमवगततत्त्वः कः करोति, व्यतिरिक्तदेशकालसंभवे हि कस्यचिदानयनं कुत्रचित् प्रहाणं संभाव्येत, इह तु सर्वस्यैव तन्मयत्वात् कस्याह्वानं कुत आह्वानं, कस्य विसर्जनं कुत्र च विसर्जनमिति तत्समावेशेनैव सर्वसंसक्तिरुक्ता ॥ १३ ॥

सूर्यशीतांशुनेत्राभ्यां
मथित्वा शक्तिवारिधिम् ।
परामृतरसाभ्यङ्गं
शिवाय विनिवेदये ॥ १४ ॥

अभ्यज्यते अनभिव्यक्तमपि व्यक्तिमानीयते सृष्टिक्रमावद्योतिता येन सोऽभ्यङ्गः उपस्नेहकः, नेत्रे प्रथमसूत्रेऽपि ॥ १४ ॥

पं० १५ ख० पु० नेत्रमथनसूत्रे इति पाठः ।

इन्द्रियेष्विन्द्रियार्थेषु
रागलोभानुयायिषु ।
निःस्नेहत्वं प्रभुत्वं च
रूक्षमुद्वर्तनं तव ॥ १५ ॥

इन्द्रियार्थेषु शब्दस्पर्शरूपरसगन्धेषु विषयभूतेषु, इन्द्रियेषु रागलोभानुयायिषु सत्सु इति व्यधिकरणे सप्तम्यौ, निःस्नेहत्वं प्रभुत्वं चात्यन्तायुक्तिरनभिष्वङ्गस्तदधिष्ठातृत्वेन वा स्फुरणम्

'बुद्धवत्सर्वरागी स्यात्सर्वद्वेष्योऽथ भैरवः ।'

इति न्यायेन उद्वर्तनमशेषवासनोन्मूलनम् ॥ १५ ॥

संशोध्यानच्छकलया
बैन्धवं तीर्थमञ्जसा ।
तद्विरामरसस्नानं
देयं चन्द्रार्धमौलये ॥ १६ ॥

महानादाद्यकलावचूलाय षोडशस्वररूपकला-

पं० १५ ख० पु० षोडशांशरूपकलाकलापारम्भकावर्णशिरोङ्कुशेति पाठः ।

कलापारम्भाद्यवर्णरूपशिरोङ्कुशरूपया अनच्छक-
लया बैन्धवं तीर्थम् उभयशून्यबिलरूपं संशोध्य
निर्ग्रन्थिबन्धं विधाय, निरोधनादनादान्तवर्ति-
परमतृप्तितालक्षणरसेन कार्यमभिषेचनम् ॥१६॥

स्वप्रबोधाम्बरोदार-
विकसद्वस्त्रघर्षणम् ।
विनिवेश्य भवत्संवि-
द्विकिरान्विकिरामहे ॥ १७ ॥

स्वप्रबोधः स्वविमर्श एव अम्बरम् अनावरणत्वात् व्योम अत एवोदारमुद्भटं विकसत् सर्वात्मतया प्रसरत् सोल्लासितकार्याच्छादकतया वस्त्रं तेन घर्षणं प्रत्यावृत्तिनयेन स्वावधानं विधाय, प्राप्ते महासामरस्ये, विगलितेषु द्वैतोदयमहासंत्रासडम्भरेषु अखण्डितस्वावबोधनिर्मत्सरबलीन् सर्वतोदिक्कं क्षिपामः ॥ १७ ॥

पं० १२ ख० पु० महामन्त्राडम्बरेषु इति पाठः ।

ज्ञानज्ञेयपरित्याग-
नगानिर्झरविप्लुतम् ।
परमानन्ददं मेऽन्त-
स्तव पाद्यमनाविलम् ॥ १८ ॥

उभयोरपि सापेक्षत्वेन अनुपपद्यमानस्वरूपत्वात् जडाजडयोः त्रिष्वपि कालेषु चिदतिरेकेणाभाव एव अगमनात् अविचलत्वात् नगः तत्र यो निर्झरो निर्गतो झरो वयोहानिरूपः कालः यस्मात् तादृक्स्वरूपं ततः प्रवृत्तं परचमत्काररूपं पाद्यम् 'झॄष्-वयोहानौ' इत्यस्य झर इति रूपम् 'ॠदोरप्' ॥ १८ ॥

अमन्दानन्दनिःष्यन्द-
स्पन्दमन्दिरकन्दरात् ।
गलत्कैवल्यसलिल-
मादत्स्वाचमनं विभो ॥ १९ ॥

गुणादिस्पन्दनिःष्यन्दिषु यत् सामान्यस्प-

न्दरूपम् अक्रमप्रकटितनिमेषोन्मेषसृष्टिस्थिति-
प्रकारम् ईषदुच्छूनतया किंचिच्चलनात्मकमपि
तदेव मन्दिरं सर्वस्य प्रथमनिवासित्वात् अम-
न्दोऽनवच्छिन्न आनन्दनिःष्यन्दोऽहमित्युल्लेख-
चमत्कारप्रसरो यत्र तादृशस्पन्दमन्दिरस्य कन्द-
रात् अगाधात् धाम्नः, उन्मिषदनन्यत्वरसरूपमा-
चमनं गृहाण कैवल्यरसमपि संहर, इति कोऽपि
बन्धमोक्षोत्तीर्णो नय उन्मीलितः 'मन्दरकन्द-
रात्' इति वा पाठः ॥ १९ ॥

प्रक्षाल्य धारणाम्भोभि-
ग्रन्थिपञ्चकमौक्तिकम् ।
अनर्घ्यमर्घं पादेभ्यः
प्रयच्छामि वृषाकपे ॥ २० ॥

हे वृष स्वशक्तिरसवर्षणप्रवण! तथा अकपे
अचपल—कूटस्थ! ग्रन्थिपञ्चकम् इन्धिका-दीपि-

पं० ३ ख० पु० निवासत्वात् इति पाठः ।

का-रोचिका-मोचिका-ऊर्ध्वगालक्षणं, मनोग्रथनात् धारणा वारुण्याद्या देशबन्धरूपाश्चित्तस्य ता एव अम्भासि तैरष्टोत्तरशतसंख्यातान्तिकमुख्यसंप्रदायसिद्धिभूमिकोलङ्घनक्रमेण अमलतामासाद्य, अनर्घ्यममूल्यम् — अतुल्यत्वात् ॥२०॥

तुरीयोद्यानविकस-
त्संवित्सौरभनिर्भरैः ।
गिरीश तिसृभिर्वाग्भिः
स्तुतिपुष्पैः प्रपूज्यसे ॥ २१ ॥

गिरि वाग्विषये ईश स्वामिन्, तुरीयोद्याने परास्वरूपकानने विकसत् यदेतत् संवित्सौरभं बोधामोदः तन्निर्भरैः, स्तुतिरूपैः पुष्पैः, तिसृभिर्वाग्भिः पूज्यसे । तत्र पश्यन्त्याः तावत् स्वरूपाव्यतिरिक्तान्तास्फुटतेदन्ताहन्तावभासपरमसामरस्यरूपा स्तुतिः, मध्यमाया अपि ग्राह्यग्राहकाकल्पकल्पनानल्पस्फुरत्तातात्पर्यपर्यवसितोऽपि

अविलुप्तस्वावभासस्तव स्तवस्तवकः, वैखर्यास्तु मौखर्येण स्फुटघटपटादिनटनलाम्पट्येऽपि सर्वतोदिक्प्रथितपरमेश्वररूपातिरेकिवाच्यान्तरविरहात् सततमेव तदनुशंसैव कुसुमिता मिताभिधाननिर्णयनिर्दलनतात्पर्यपर्यवसिता इत्युक्तं भवति ॥ २१ ॥

प्राणवह्निशिखास्त्रेण
भङ्क्त्वा ब्रह्मबिलं लसत् ।
धूपवर्तिनिभाभासो
धूपस्ते नगजाधव ॥ २२ ॥

प्राणोद्दीपिता येयं वह्निशिखा—आग्नेयधामकोटिः, सैव अस्तात् त्रायते इति अस्त्रम्, अथ वा निष्कलनाथोऽत्र उद्धृतः, तेनैव हिक्कापातोद्दीपितेन ग्रन्थिभेदनक्रमेण ब्रह्मग्रन्थिभेदात्, तत्र प्राणो 'ह' वह्निशिखारूपमस्त्रम् इत्यादि, सर्वप्र-

पं० ९ क० पु० धूपयन्ति निभेति पाठः ।

मेयजातं धूपयति सर्वं स्वपरिस्पन्देनाधिवासयतीति धूपः ॥ २२ ॥

अनाहता नदत्यन्त-
र्या गौर्धाम्नि परे परा ।
सा घण्टा वाद्यते शम्भो-
रग्रे ग्रन्थार्थगर्भिणी ॥ २३ ॥

अघंटसिदिति त्रोटयति इति अघण्टा, परा प्रकृष्टा, ग्रन्थार्थगर्भिणी – अन्तरितसकलवाच्यवाचककलापा ॥ २३ ॥*

कन्दानलोल्लसच्छक्ति-
शिखां दीपशिखोपमाम् ।
उद्दीपयामि भगव-
न्मोहध्वान्तापनुत्तये ॥ २४ ॥

* अस्य पद्यस्य व्याख्यानमसमञ्जसं खण्डितपूर्वभागं च प्रतिभाति द्वयोरादर्शपुस्तकयोस्तथादर्शनात् यथावदेवोपन्यस्तम् । [परे धाम्नि द्वादशान्ते अन्तरस्फुटतया अनाहता स्वयमुच्चरन्ती या परा वाक् नदति, सा घण्टा वाद्यते इत्यन्वयेन संगतः पदार्थः]

कन्दानलात् आधारमध्यधाम्नः उल्लसन्ती शक्तिशिखा बिन्दुरूपा, तां शाक्तस्फारोद्दीपनात् दीपरूपां नादसूचिशेखरमुद्रानुप्रवेशेन उद्दीपयामि ॥ २४ ॥

वृत्तित्यागामृतकला-
चन्द्रश्चन्द्रकिरीटिनः ।
समालम्भनवेवास्तु
मुमुक्षूणां विमुक्तये ॥ २५ ॥

प्रमाणविपर्ययविकल्पनिद्रास्मृतिवृत्तिप्रहाणपरिशिष्टतदनुप्राणकाविनाशबोधघनसाररूपं सम्यक् आलम्भनं समालम्भनं, सर्वाच्छुरणात् समालम्भकं वा तादृशा एव हि मुमुक्षवो मुच्यन्ते इति । तदुक्तमुत्पलदेवपादैः

'योऽविकल्पमिदमर्थमण्डलं
पश्यतीश निखिलं भवद्वपुः ।
स्वात्मपक्षपरिपूरिते जग-
त्यस्य नित्यसुखिनः कुतो भयम् ॥'

इति ॥ २५ ॥

नादशक्त्युदितं धाम
मलत्रयविवर्जितम् ।
उष्णीषमस्तु ते रुद्र
विद्रावितनभोऽर्गलम् ॥ २६ ॥

नादशक्तेः बिन्दूर्ध्वकलाया उदितम् उपरिगतं नादान्ततेजोव्यपदेश्यं प्रकाशकत्वात् धाम, तदेव अवच्छेदहेतुना आणवादिना मलत्रयेण विरहितम्, तथा विद्रावितनभोऽर्गलम् क्षपितपरव्योमानुवेधनिरोधकग्रन्थिचक्रम्, उषणे विकल्पप्लोषणे ईशम् उष्णीषमिति अक्षरसाम्येनापि निरुक्तिः ॥ २६ ॥

भवद्भक्तिसुधासार-
संप्लावितहृदम्बुधेः ।
प्रोल्लसद्ब्रह्मकमल-
ममलं तेऽस्तु शेखरम् ॥ २७ ॥

पं० ६ ख० पु० नादान्तभेदेन व्यपदेश्यमिति पाठः ।

अनुग्रहशक्तिरूपभक्त्यमृतवर्षागाधीकृतहृत्समु-
द्रप्रतिभातब्रह्मपुण्डरीकं शिखान्तप्रान्तकोट्यवभा-
सनात् शेखरम् ॥ २७ ॥

बोधारबिन्दसंदोहो
हर हारलता तव ।
नित्योदितान्तरव्याप्ति-
कला चन्द्रकला च ते ॥ २८ ॥

नानाकारकरणेश्वरीसमुपहृतविषयोपहारहार-
लतावतस्तदैक्यसमापत्तिमहाकाशव्याप्तिरेवाह्ला-
दनदीप्तिधात्वर्थानुगमात् चन्द्रकला, तवेति चन्द्र-
कमलमीलननयः कोऽपि गुरुमुखरहस्यक्रम उद्दी-
पितः ॥ २८ ॥

आकृष्यार्ककरैः शाक्तै-
र्विश्वाकाशकुशेशयात् ।
चिच्चन्द्रामृतनिःष्यन्द-
मास्वादय जगत्पते ॥ २९ ॥

विश्वाकाशकुशेशयात् प्लावकरसयुक्त्या अखिलविगलनक्रमेण । तदुक्तं मया चक्रेश्वरभैरवाष्टके

'भूतचतुष्टयकवलन-
बृंहिततनुगगनमप्यनुच्चण्डम् ।
परमाणुवत्प्रहीणं
यत्र नभस्तन्नुमः शैवम् ॥'

इति । शाक्तैरर्ककरैर्महाकालसंकर्षिणीकिरणैः चिद्रूपचन्द्रपीयूषरसचर्वणेन चिन्नभसोऽपि उ........ ....णतापादनानन्तरसकलधामघट्टनात् घोराघोरघस्मररावारावविद्रावणचक्रातिचक्रोत्तरमहास्फारमयमहामुद्राविद्रावणानुत्तरपरपरिस्पन्दसौन्दर्यावद्योतनेनामावस्यावासनावासितः कोऽपि संप्रदाय उट्टङ्कितः ॥ २९ ॥

मन्त्रं मनसि तच्छक्तौ
तां स्वधाम्नि सदोदिते ।
कृत्वा जपविधिं सम्यक्
शिवाय विनिवेदये ॥ ३० ॥

पं० ४ ख० पु० गगनमध्यमुच्चण्डम् इति पाठः ।

'सहस्रो मानस' इति नीत्या मन्त्रमनाहतसततोच्चरदकुलभट्टारकाकारम्

'आ गोपालाङ्गनाबालम्लेच्छाः प्राकृतभाषिणः ।
अन्तर्जलचराः सत्त्वास्तेऽपि नित्यं ब्रुवन्ति तम् ॥'

इति प्राणात्मिककलांशांशिकास्थितसमस्ततिथिविषुवदयनपरिगमपूरपूरिताशेषजपफलमेकोच्चारविप्रसृताक्षमालाक्षमालोपरिगताद्यन्तकर्मस्पन्दमेरुपर्यावृत्तिदर्शितसृष्टिसंहारं मनसि अवधानमये कृत्वा, तदपि मनः प्राप्तमन्त्रसामरस्यं शक्तौ प्रथनप्रथमवीर्ये कृत्वा, शक्तिमपि निजमहिमनि नित्यमपरित्यक्तसार्वात्म्यसर्वोत्तीर्णतातिरेकमहोदये सर्ववर्णानां शक्तिक्रमस्फुरिततत्तत्स्वरूपानुप्राणनेन स्वरूपलाभात् । तदुक्तम्

'तदाक्रम्य बलं मन्त्राः'

इति। एवंविधं जपमकरणकरणेन निर्वर्त्य, शिवाय स्वात्ममहेश्वरे तादर्थ्येन विशेषेण निरवशेषं बुद्धौ सम्यक्, इत्येवंविधमहावीर्यस्फारसामरस्यमयसत-

तोदितजपावधानातिरेकेण पशूनां जप उच्चरित-प्रध्वंसिवर्णनिर्वर्त्यः, एतत्परमार्थतायामपि निर्वीर्यबीजतया न सम्यक्सिद्धिसाधनभावमश्नुत इति उक्तं भवति ॥ ३० ॥

निःशेषार्थपरित्यागे
ग्रहणे वामितद्युते ।
अनाबिलां परां व्याप्तिं
मुद्रां बध्नामि धूर्जटे ॥ ३१ ॥

धुनोति सर्वं, रंहति सर्वत्र, जनयति सर्वं, टीकते सर्वत्र इति आगूरिताक्रमचतुष्टयार्थो धूर्जटिः । एतां लयोदयमुद्रामेकामपि पञ्चधा वक्ष्यमाणनयेन स्फुरन्तीं बध्नामि आत्मसात्करोमि । अखिलार्थपरिहारे वा स्वीकारे वा अस्खलनात् अपरिच्छिन्नमहिमन्!, वेद्यवेदककालिकाभिः अकलुषिताम्, अकृत्रिममहाव्याप्तिमयीम् । इयमेव च अन्तर्लक्ष्यबहिर्दृष्टिभावेन त्यागग्रहाभ्यां भैरवी, अखिलास्वादचमत्कारस्फुरणाभ्यामपि त्यागग्रह-

विग्रहा लेलिहाना, सर्वपरिक्षपणेन च स्वावशेषमात्रेणापि त्यागग्रहात्मिकैव करङ्किणी, स्वरूपाक्षमतायामपि तद्ग्रासगृध्नुस्फुरत्तासारैव तद्रूपैव क्रोधिनी, परव्योम्नि व्याप्त्युन्मिमिषासंजिहीर्षात्मकोल्लासोपशमसाध्यैव खे चरतीति खेचरी इत्येतल्लक्षणलक्षिततयैव सर्वमुद्राणामियमेकैव पञ्चधा प्रसरन्ती तत्तद्वचनभेदैश्चर्व्यते चर्च्यते च ॥३१॥

शष्कुलीकर्णयोर्बद्धा
यो रावोऽत्र विजृम्भते ।
तद्गीतमथ ते वाद्य-
माद्यसंपुटघट्टनात् ॥ ३२ ॥

श्रोत्रपुटिकाबन्धयोः योऽन्तर्निनदन्निव सामान्यस्वररूपो योऽसौ, गीतं स एव, आद्यकन्दोभयपक्षसंकोचात् नानानाडीवेणुवने विचरन् उपजनितततघनसुषिरतारमन्द्रमध्यमभेदाङ्कुरितकलाप्रस्तारास्वृतचञ्चत्पुटचाषपुटपञ्चपाणिप्रमुख-

मुखरतरतारभेदो वाद्यभावं भजते। 'शष्कुलीकर्णयोरन्तर्' इति वा पाठः—गोलकतच्छक्त्योरेन्तरित्यर्थः। गोप्य इति पाठे भगवत आमन्त्रणम् स्वप्रकाशत्वादनन्यप्रकाश्य! इत्यर्थः, शष्कुलीकर्णयोराद्यसंपुटघट्टनात् यो रावस्तद्गीतमिति अन्वीयते॥ ३२॥

भवद्भावरसावेशा-
त्ताण्डवाडम्बरोद्धतः।
मन्त्राध्वनि नदाम्यन्तः
किमु बाह्यार्थभावनैः॥ ३३॥

त्वन्मयतोत्कर्षेषु शृङ्गारादिष्वपि रसेषु आवेशात्त्वदनुकारिविकीर्णनिजमरीचिमयकरकल्पितसंकीर्णासंकीर्णपताकादिसमुद्बोधितभाववैभवाभिनयो भवाभवोद्धट्टनविघट्टनजवनिकाप्रवेशनिर्गमनाकम्पितस्वरूपोऽपि नृत्तमारभे, तदुक्तं मया शिवरात्रिविचारवार्तिके

पं० १ क० पु० बाह्यभावमिति पाठः।

पं० ७ ख० पु० भवद्भक्तिरसेति, डम्बरोद्यत इति च पाठः।

'नित्यमात्तकरणक्रमोन्मिष-
च्चित्रभावशतसंनिवेशिनीः ।
निष्क्रियो निजमरीचिनर्तकी-
र्नर्तयामि परनृत्तदैशिकः ॥'

इति । मन्त्राध्वनि ध्वनिधामनि गुप्तभाषणप्रवण-पश्यन्तीपदे, यद्वा वाच्यवाचकाध्वषट्कमध्यवर्ति-पञ्चमन्त्रमहिमनि, नदामि चिद्भैरवैकघनताप्रमोदेन गर्जामि । किं वराकैर्बाह्यविषयविकल्पातङ्कैः, इति पररसपरितृप्तिमहोद्गारं प्रकटयति 'न माम्यन्तः किमु बाह्येऽत्र भौवने' इति वा पाठः, तत्र न मामि न वर्ते किमु भौवने कलादौ अकलान्ते भुवनाध्वनि इत्यर्थः ॥ ३३ ॥

अखण्डमण्डलाकार-
शिवताभावनाम्बरम् ।
उपरिष्टान्मया शम्भो-
र्वितानमुपकल्पितम् ॥ ३४ ॥

पं० ८ ख० पु० विकल्पाडम्बरैरिति पाठः ।

वितनोति सर्वं वितन्यते वा सर्वत इति वितानम् ॥ ३४ ॥

रेचयित्वा करन्ध्रेण
भाचक्रं हृदयाम्बरात् ।
धार्यते धूर्जटेरग्रे
चारुचामरवन्मया ॥ ३५ ॥

प्रबुद्धकुण्डलिनीस्पष्टीभावभासुरमध्यमधामदण्डानुप्रेरणप्रयत्नप्रसृतब्रह्मबिलोत्कालितबैन्धवदीप्तिवृन्दं हृदयगगनप्रसृतं त्रिविधतापहारितया चामरं धारयामि ॥ ३५ ॥

नासापुटकुटीकोटि-
विसृतैः प्रसृतैः पुरः ।
तालवृन्तैरिव विभो
वीज्यसे हंसमारुतैः ॥ ३६ ॥

विसृतैः प्रविष्टैः, प्रसृतैर्निर्गतैः, हंसमारुतैः प्राणपवनैस्तालवृन्तैरिवोत्क्षेपकतुल्यैः ॥ ३६ ॥

सर्वातपविनिर्मुक्तं
भवद्भक्तिसुधासितम् ।
आतपत्रमथास्माभि-
र्धार्यते ते महाशय ॥ ३७ ॥

विषयासङ्गकलिलरहितं, त्वन्मयतामृतविमलं छत्रं धार्यते ॥ ३७ ॥

ममतामन्दुरात्यागा-
त्त्रैलोक्याकर्षणक्षमः ।
अहंकारतुरङ्गस्ते
वाहनाय प्रकल्पितः ॥ ३८ ॥

भवनिरावरणविजययात्रोपक्रमे नियताहन्ताममतापरिक्षये पूर्णाहन्तात्मकोऽहङ्कारो हयस्त्वदतिवाहनाय ॥ ३८ ॥

स्वसंविन्नन्दनानन्द-
नागवल्लीदलोज्ज्वलम् ।

स्फुरत्स्पन्देन्दुसुरभि
ताम्बूलं ते निवेद्यते ॥ ३९ ॥

ताम्बूलं – ताम्रभवामूलम् अखिलोपरञ्जकत्वात्, निजबोधानन्दनन्दनोद्यानप्रफुल्लो, नागः शारीरः पवनविशेषः तस्य वल्ली प्रथमप्राणोद्भेदशक्तिः तत्संपत्तिकासुन्दरम्, उद्गच्छदाद्येच्छाचिमिचिमिकाकर्पूरवासिता – उभयोरपि सर्वचमत्कारकत्वात् ॥ ३९ ॥

भोग्यभोक्तृविभेदोत्थ-
वासनेन्धनसंचयम् ।
अद्वैताग्नौ जुहोम्यन्तः
शांकरे श्रेयसां निधौ ॥ ४० ॥

भोग्यभोक्तृविभागतदुद्गतवासनादारुविसरम् अविभागशम्भुधाम्नि सामरस्यं लम्भयामि ॥४०॥

प्रकाशाकाशहस्ताभ्या-
मवलम्ब्योन्मनास्रुचम् ।

धर्माधर्मगलत्स्नेह-
पूर्णां वह्नौ जुहोम्यजे ॥ ४१ ॥

अजे सर्वादिसिद्धे पूर्वोदिते शिवधामहव्यभुजि ग्राह्यग्राहकभेदवासनेन्धनदहनसमेधिते स्वरस-विगलितप्रियाप्रियफलधर्माधर्मनिबद्धवासनाघृत-पूर्णाहुतिं जुहोमि अविमर्शतद्विरामरूपसमनोन्म-नापाणिभ्यां सूक्ष्मकरणशक्तितदुपरमाङ्गुलिपञ्च-कोपशोभिताभ्यां तदुपरिवर्तनात् 'उन्मन्यन्ते परः शिव' इति दृशा उन्मनास्रुचं परिगृह्य पूर्णां जुहोमि, इति संक्षयप्रधानायामपि वृत्तौ अविलु-प्तमेव पारिपूर्ण्यम्—इति पूर्णकृशदेवतैकात्म्यमयः कोऽपि नयः प्रथितः। उक्तं च मयैवाकुलका-लिकात्रिंशिकायाम्

'स्वानन्दतस्त्रिभुवनं कवलं विधाय
स्वात्मानमप्यतितरां समदा ग्रसन्ती।
तृप्ता तथाप्यपरिखण्डितनित्यासिद्ध-
स्वातन्त्र्यपूर्णविभवा कृशमूर्तिरव्यात् ॥'

इति ॥ ४१ ॥

युष्मद्ध्याननिशानाथ-
किरणैरुपरञ्जितः ।
अन्तर्मानविधौ तेऽस्तु
चित्तचिन्तामणिर्मम ॥ ४२ ॥

बाह्यव्यावृत्तिविगमपूर्वकम् अन्तर्मननम् अनन्यतया स्फुरणम् अन्तर्मानं तद्विधौ, त्वदनुभवशशिप्रकाशविवशीकृतः, चित्तमेव चिन्तामणिर्भवत्समावेशेन तद्वदेव संकल्पमात्रेण सर्वसमुल्लासात् ॥ ४२ ॥

मोक्षलक्ष्मीकराम्भोज-
पात्रे विन्यस्य संस्कृताम् ।
निवेदयामि भगवन्
प्राणसर्वस्वदक्षिणाम् ॥ ४३ ॥

प्राणा एव तेषां वा सर्वस्वम् आणवं स्वरूपं, तत् निवेदयामि — मायीयपारिमित्याभासनिरास-समुपलब्धसततासिद्धपरपारिपूर्ण्यबृंहिततया निः-

शेषतो वेदयामि । मोक्षलक्ष्म्या भवौन्मुख्यपरावृत्तायाः संविद्देव्याः कराम्भसि परमवीचिनिःष्यन्दे जातं यत् पात्रं पातत्राणात्मकम् अविलुप्तम् अवधानं, तदर्पितं कृत्वा, संस्कृतां कृतशास्त्राचार्यसंप्रदायोपस्कराम् । तदेवं मायोपकल्पिततत्तदवच्छेदविच्छेदिक्रमाक्रमचक्रचारमहासामरस्यसमापत्तिप्रतिपादनेन यदेव 'नमः सूर्यकला' इत्यादिना प्रक्रान्तं तदेव पर्यवसितम् ॥ ४३ ॥

संसारवारिधेः सन्तः
परं पारं तितीर्षवः ।
चन्द्रमौलेः श्रयन्तूच्चै-
र्भावपूजातरण्डकम् ॥ ४४ ॥

श्रयन्तु अवधानेन सेवन्ताम्, भावपूजामयं तरण्डकं पोतम् ॥ ४४ ॥

इत्थमीशानचरण-
नुतेर्यत्समुपार्जितम् ।

पं० १५ ग० पु० ईशानचरणौ नुत्वा इति पाठः ।

श्रेयस्तेन जगत्कृत्स्नं
द्वेषदोषाद्विमुच्यताम् ॥ ४५ ॥

नियतदर्शनावग्रहग्रहसमुद्गतदर्शनान्तरानिर्भर्त्सनाखण्डनसमयलोपात् जगत् विमुक्तमस्तु, नियतदर्शनहेवाकिता हि सर्वोदयविश्रामभूमिभूतपरतत्त्वपरिखण्डनत्वामरत्वात् सर्वस्यैव परः प्रकारः। तदुक्तं मया कृतान्ततान्तिशान्तिस्तवे

'मायेयं बहुरूपतामुपगता नाना यथा ते विभो
विद्याप्येवमनन्तभेदगहना नो चेत्कथं स्यादिदम्।
नैःस्वाभाव्यगमेन केचन परे वैविक्त्यतः केऽपि वा
सार्वात्म्येन परे तदुत्तरदृशा मुक्ताः परे सर्वतः ॥'

इति। अद्वयद्वादशिकायामपि

'यद्यतत्त्वपरिहारपूर्वकं
तत्त्वमेषि तदतत्त्वमेव हि।
यद्यतत्त्वमथ तत्त्वमेव वा
तत्त्वमेव ननु तत्त्वमीदृशम् ॥'

इति ॥ ४५ ॥

पं० ६ ख० पु० संसारस्यैवापर इति पाठः।

पं० १६ ख० न च तत्त्वमिति पाठः।

स्तोत्रं गृहाण परमेश्वर विश्वसाक्षिन्
मानावमानममतोज्झितचित्तवृत्तेः ।
मत्तस्त्वदङ्घ्रियुगपीठनिलीनमौले-
र्भस्मावगुण्ठिततनोर्नृकपालपाणेः ४६

विश्वस्य साक्षी विश्वरूपो वा आमन्त्र्यते, मानावमानयोः ग्रहणाग्रहणयोः निष्प्रपञ्चप्रपञ्चयोः ममतया उज्झिता चित्तवृत्तिर्यस्य तद्युक्ता वा त्यक्ता चित्तवृत्तिर्येन, अंहः पापं हरति इति, अहंकृद्देव वा अङ्घ्रिः तद्युगम् अनावरणज्ञानक्रियारूपं तस्य पीठं परमशिवरूपं तत्र निलीनमौलेः प्रशान्तकरणचन्द्रपञ्चककचितचित्तशेखरस्य, तथा भस्मना कारणपञ्चककञ्चुकोपचयप्लोषपरिशिष्टेन अखिलभूतिहेतुना अवबोधभूतिविभवेन अवगुण्ठिता आच्छादिताः तनवः मिततया स्फुरन्तः सर्वभावा येन, नुः अणोर्यत्कपालं, कं महास्वातन्त्र्यरूपम् अनवच्छिन्नं ब्रह्म पालयति गोपायतीति नृकपालं

कर्परं तत् पाणौ एकस्मिन् उद्धुभूषामरीचिलक्षणे मिततया इयत्तया तुलितं यस्य स तथोक्तः ४६

महापाशुपतोद्याने
कश्चिद्विश्रम्य तापसः ।
चक्रे चिच्चक्रनाथस्य
शम्भोर्भावनुतिं पराम् ॥ ४७ ॥

'निरस्तशास्त्रार्थविकल्पजाला
देव्यः श्मशाने करवीरकाख्ये ।'

इति दृशा भस्मशब्दव्याख्यानवर्णितस्वरूपे महापाशुपतोद्याने, भैरवाणां पशूनां पतिरकलितचिच्चक्रेश्वरात्मकः तदुद्याने तदूर्ध्वयाने सर्वातिशायिनि, विश्रम्य अनन्यतया प्रतिष्ठां प्राप्य, अत एव कश्चित् अज्ञायमानपशुपरिकल्पितनियतसंज्ञावच्छेदो, महति तपसि चित्समावेशमये भवः तापसः चिच्चक्रनाथस्य

'सर्वसंविन्नदीभेदाभिन्नाविश्रामभूमये ।
नमः प्रमातृवपुषे शिवचैतन्यसिन्धवे ॥'

इत्यादिना राजानकोत्पलदेवनिर्वर्णितस्वरूपस्य शम्भोः श्रेयःप्रभवस्य भावेन सर्वभावैक्यसमापत्तिसमावेशमयेन नुतिं परां चक्रे, इति चक्रनाथ-चक्रेशब्दाभ्यामात्मनः चक्रपाणिनाम द्योतयति ॥ ४७ ॥

'अदृष्टविग्रहागतं
मरीचिचक्रविस्तरम् ।
अनुग्रहैककारणं
नमाम्यहं गुरुक्रमम् ॥'

योगानन्दाभिधानद्विजवरवदनागातपीठेशिदेवी-
पादावद्योतिताज्ञप्रणयनजनितानन्तसोत्साहहर्षः ।
स्तोत्रे भावोपहारे विवरणमकरोद्रम्यदेवो द्विजन्मा
जन्माद्यायासभङ्गप्रवणमतिलसत्सद्रहस्योपदेशः ॥

इति श्रीचक्रपाणिनाथविरचिते भावोपहारस्तोत्रे विवरणं समाप्तम्
कृतिस्तत्रभवन्मट्टज्योग्देवात्मज-भट्टश्रीरम्यदेवस्य ॥

सद्विद्यानां संश्रये ग्रन्थविद्वद्-
व्यूहे ह्रासं कालवृत्त्योपयाते ।
तत्तत्सद्धर्मोद्दिधीर्षैकतान-
सत्प्रेक्षौजःशालिना कर्मवृत्त्यै ॥ १ ॥

श्रीमत्कश्मीराधिराजेन मुख्यै-
र्धर्मोद्युक्तैर्मन्त्रिभिः स्वैर्विविच्य ।
प्रत्यष्ठापि ज्ञानविज्ञानगर्भ-
ग्रन्थोद्धृत्यै मुख्यकार्यालयो यः ॥ २ ॥

तत्राजीवं निर्विशद्भिर्मुकुन्द-
रामाध्यक्षत्वाश्रितैः सद्भिरेषः ।
पूर्त्या शुद्ध्या व्याख्यया संस्कृतः स्तात्
पूर्णो ग्रन्थः श्रेयसे सज्जनानाम् ॥ ३ ॥

(तिलकम्)

श्रीस्वात्मशिवार्पणमस्तु ॥

ओं नमोऽनन्तचिन्मूर्तये शंकराय ।

अथ

बोधपञ्चदशिका ।

श्रीमदाचार्याभिनवगुप्तपादविरचिता

ओं अनस्तमितभारूप-
स्तेजसां तमसामपि ।
य एकोऽन्तर्यदन्तश्च
तेजांसि च तमांसि च ॥ १ ॥
स एव सर्वभूतानां
स्वभावः परमेश्वरः ।
भावजातं हि तस्यैव
शक्तिरीश्वरतामयी ॥ २ ॥
शक्तिश्च शक्तिमद्रूपा-
द्व्यतिरेकं न वाञ्छति ।
तादात्म्यमनयोर्नित्यं
वह्निदाहिकयोरिव ॥ ३ ॥

स एव भैरवो देवो
जगद्भरणलक्षणः ।
स्वात्मादर्शे समग्रं हि
यच्छक्त्या प्रतिबिम्बितम् ॥ ४ ॥
तस्यैवैषा परा देवी
स्वरूपामर्शनोत्सुका ।
पूर्णत्वं सर्वभावेषु
यस्य नाल्पं न चाधिकम् ॥ ५ ॥
एष देवोऽनया देव्या
नित्यं क्रीडारसोत्सुकः ।
विचित्रान्सृष्टिसंहारा-
न्विधत्ते युगपद्विभुः ॥ ६ ॥
अतिदुर्घटकारित्व-
मस्यानुत्तममेव यत् ।
एतदेव स्वतन्त्रत्व-
मैश्वर्यं बोधरूपता ॥ ७ ॥
परिच्छिन्नप्रकाशत्वं
जडस्य किल लक्षणम् ।

जडाद्विलक्षणो बोधो
यतो न परिमीयते ॥ ८ ॥
एवमस्य स्वतन्त्रस्य
निजशक्त्युपभेदिनः ।
स्वात्मगाः सृष्टिसंहाराः
स्वरूपत्वेन संस्थिताः ॥ ९ ॥
तेषु वैचित्र्यमत्यन्त-
मूर्ध्वाधस्तिर्यगेव यत् ।
भुवनानि तदंशाश्च
सुखदुःखमतिर्भवः ॥ १० ॥
यदेतस्यापरिज्ञानं
तत्स्वातन्त्र्यं हि वर्णितम् ।
स एव खलु संसारो
जडानां यो विभीषकः ॥ ११ ॥
तत्प्रसादरसादेव
गुर्वागमत एव वा ।
शास्त्राद्वा परमेशस्य
यस्मात्कस्मादुपागतम् ॥ १२ ॥

यत्तत्त्वस्य परिज्ञानं
स मोक्षः परमेशता ।
तत्पूर्णत्वं प्रबुद्धानां
जीवन्मुक्तिश्च सा स्मृता ॥ १३ ॥
एतौ बन्धविमोक्षौ च
परमेशस्वरूपतः ।
न भिद्येते न भेदो हि
तत्त्वतः परमेश्वरे ॥ १४ ॥
इत्थमिच्छाकलाज्ञान-
शक्तिशूलाम्बुजाश्रितः ।
भैरवः सर्वभावानां
स्वभावः परिशील्यते ॥ १५ ॥
सुकुमारमतीञ्शिष्या-
न्प्रबोधयितुमञ्जसा ।
इमेऽभिनवगुप्तेन
श्लोकाः पञ्चदशोदिताः ॥ १६ ॥

समाप्ता चेयं बोधपञ्चदशिका ।

कृतिर्महामाहेश्वराचार्यवर्य-श्रीमदभिनवगुप्तपादानाम् ।

प्रकाशिता च काश्मीरमहाराजाश्रितपण्डित-मुकुन्दराम-शास्त्रिणेयम् ।

मुंबई—"तत्त्वविवेचक" प्रेस.

ॐ नमोऽनुत्तरप्रकाशशंकराय ।

अथ

अनुत्तरप्रकाशपञ्चाशिका ।

श्रीआद्यनाथविरचिता ।

अकृत्रिमाहमामर्शप्रकाशैकघनः शिवः ।
शक्त्या विमर्शवपुषा स्वात्मनोऽनन्यरूपया॥ १ ॥
शिवादिक्षितिपर्यन्तं विश्वं वपुरुदञ्चयन् ।
पञ्चकृत्यमहानाट्यरसिकः क्रीडति प्रभुः ॥ २ ॥
पृथगर्थमर्थवत्ता विश्वविश्वशरीरयोः ।
न विश्वविश्ववपुषोर्भिन्नता कापि तात्त्विकी ॥३॥
भेदे सत्तास्फुरत्ताभ्यां भिन्नं किं तु जगद्भवेत् ।
सत्तास्फुरत्तासंबन्धात्सत्ता भानं च तन्न चेत् ॥४॥
असतः किं सतस्ताभ्यां संबन्धः सोऽयमिष्यते ।
स्वरूपलाभसुलभः संबन्धो नह्यवस्तुनः ॥ ५ ॥
न लब्धरूपसंबन्धे ताभ्यां किंचिदपेक्ष्यते ।

अपेक्षायामवस्थानं न स्यादेतस्य किंचन ॥ ६ ॥
स्वभावतः स्फुरत्ता च सत्ता च न विनाशिनी ।
विनाशानभ्युपगमे जडतापि निवर्तते ॥ ७ ॥
ततो गत्यन्तराभावाच्चिदेव परिशिष्यते ।
सतश्चिदैक्यं प्रकृतं कदाचिन्न निवर्तते ॥ ८ ॥
प्रकाशोऽनन्यतो भावः स्वातन्त्र्योल्लासकेवलः ।
परिच्छिन्नात्मिका शक्तिः शम्भोर्विश्वातिशायिनः ॥ ९ ॥
यत्प्रकाशात्मकं सर्वं तमःकेवलतां गतम् ।
यच्च किंचिज्जगदेतत्प्रकाशादतिरिच्यते ॥ १० ॥
विमृश्यसरणीं प्राप्तमित्येषा तात्त्विकी मतिः ।
अवभासैकतानानां मतिरेकात्र साक्षिणी ॥ ११ ॥
किं प्रमाणैर्वराकैस्तैश्चिदनुप्राणितात्मभिः ।
नहि वैकर्तनं ज्योतिर्दीपालोकमपेक्षते ॥ १२ ॥
शक्तिपातपवित्रेऽस्मिन्धीतत्त्वे च परीक्ष्यताम् ।
आदर्शविमलाभोगे न तु सर्वं प्रकाशते ॥ १३ ॥

इत्थं चिदात्मकं सर्वं षट्त्रिंशद्भेदतत्त्वतः ।
आदौ शुद्धात्मकं तत्त्वं पञ्चधा तमसः परम्
॥ १४ ॥

शिवः शक्तिश्च सादाख्यमीशो विद्येति भिद्यते ।
अक्षादिशान्तवर्णात्मा निरमायि शिवेन तु
॥ १५ ॥

कलाविद्यारागकालनियतिर्बन्ध उच्यते ।
मायापूर्वो वकारादिक्षकारान्ताक्षरात्मकः ॥१६॥
पुमाञ्शक्तिर्मनो बुद्धिरहंकारादिपञ्चकम् ।
श्रोत्रादिपञ्चकं तादि टादि वागादिपञ्चकम्
॥ १७ ॥

तन्मात्रपञ्चकं चादि कादि व्योमादिपञ्चकम् ।
सिसृक्षोः प्रथमस्पन्दः शिवतत्त्वं विभोः स्मृतम्
॥ १८ ॥

इच्छैव सापरिम्लाना शक्तितत्त्वमुदञ्चयन् ।
स्वेच्छया सूचितं विश्वमाच्छाद्याहन्तया स्थि-
तम् ॥ १९ ॥

---

१ इत्थमित्यादि पद्यपञ्चकं ग्रन्थान्तरैर्विसंवाद्यर्थकमादर्शान्तरानुपलब्ध्या यथावदुपन्यस्तम् ।

स एव तत्त्वं सादाख्यं सर्वानुग्रहणोद्यतम् ।
स एवेश्वरतत्त्वं स्यात्पश्यन्विश्वमिदन्तया ॥२०॥
इदन्ताहन्तयोरैक्यमिति विद्या निगद्यते ।
स्वाङ्गकल्पेषु भावेषु मायातत्त्वं विभेदधीः॥२१॥
मायागृहीतसंकोचः शिवः पुंतत्त्वमुच्यते ।
अयमेव हि संसारी जीवो भोक्तैव दृश्यते ॥ २२ ॥
ज्ञत्व-कर्तृत्व-पूर्णत्व-नित्यत्वान्यस्य शक्तयः ।
तत्संकोचात्संकुचितः कलाद्यात्मतया मतः॥२३॥
मायात्मकं कला नाम किंचित्कर्तृत्वकारणम् ।
विद्या किंचिज्ज्ञताहेतू रागोऽभिष्वङ्गकारणम् २४
कालः परिच्छेदकरो नियतिश्चेदमेव मे ।
कर्तव्यं नान्यदित्येषा व्यवस्था यन्त्रणाकृतिः २५
प्रकृतिर्गुणसाम्यं स्यादहंकारादिजन्मभूः ।
अहं ममेदमित्येतद्बुद्धिहेतुरहंकृतिः ॥ २६ ॥
बुद्धिरध्यवसायस्य कारणं निश्चयात्मनः ।
संकल्पस्य विकल्पस्य बीजं मन उदीर्यते ॥ २७ ॥
वचनादेश्च शब्दादेर्वागादि-श्रवणादिकम् ।

कारणं श्रवणादीनां ग्राह्यं तन्मात्रपञ्चकम् ॥२८॥
आकाशाद्यवकाशादिकारणं भूतपञ्चकम् ।
परापराशक्तिमये शुद्धे विद्यादिपञ्चकम् ॥ २९ ॥
तदन्यदपराशक्तिरित्येतत्तत्त्वमीरितम् ।
इयं देवी परा शक्तिः शुद्धाशुद्धाध्वगर्भिणी ॥३०॥
पृथिव्यादीनि तत्त्वानि यदा लीनानि कारणे ।
तदा कारणमात्राणि बहिरुद्गमते विभुः ॥ ३१ ॥
[1]अनुत्तरेच्छे उन्मेष आनन्देशनमूनता ।
क्रियेच्छाज्ञानशक्तीनां सत्ता षट्‌···· ॥ ३२ ॥
इच्छेशनान्तरारूढा स्फुटास्फुटजगन्मयी ।
चत्वारः परतो वर्णाः षण्डात्मानः प्रचोदिताः ॥ ३३ ॥
अनुत्तरानन्दरूढा स्फुटास्फुटजगन्मयाः ।
चत्वारः परतो वर्णाः षण्डात्मानः प्रचोदिताः ॥ ३४ ॥
अनुत्तरानन्दशक्तिस्त्रिकोणाद्वृत्तियोगतः ।

---

१ अनुत्तरेत्यादित्रिपद्येष्वर्थासंगत्या पाठाशुद्धिः प्रतिभाति ।

तथैवोन्मेषयोगेन क्रियाशक्तेः स्फुटं वपुः ॥ ३५ ॥
उक्तं त्रिशक्तिसंघट्टात्रिशूलं द्वैतघस्मरम् ।
परस्परविरोधे तु कार्येषु प्रविरोहति ॥ ३६ ॥
न कथंचिदुपादेयमासां रूपमिदं भवेत् ।
बिन्दुर्वेद्यस्य संस्कारो विमर्शः सर्ग इत्यसौ ॥३७॥
कलाषोडशकाकारा शक्तिर्विजयते परा ।
तिथयः प्रतिपत्पूर्वाः पञ्चदशेति मायया ॥ ३८ ॥
सूर्याचन्द्रमसौ स्वान्तश्चरन्तौ स्थितिहेतवे ।
यथा विमर्शवपुषः सर्गस्याद्याः कलाः स्मृताः ॥ ३९ ॥
द्विधेयं मातृका देवी बीजयोन्यात्मना स्थिता ।
नित्यप्रवृत्तशृङ्गाटवपुर्विश्वस्य जन्मभूः ॥ ४० ॥
हृदयं बीजमेतस्यां सारं यत्तत्परं महः ।
वटबीजे यथा वृक्षस्तथात्र निहितं जगत् ॥ ४१ ॥
विचार्यमाणे नैवेदं कारणादतिरिच्यते ।
मृदादेः कलशादीनां तत्त्वं नान्यन्निरूपणे ॥४२॥
इत्याहुस्तत्त्ववादिन्यः श्रुतीनामन्तिमा गिरः ।

इदं सर्वं सदेवासीदग्रे इति विनिश्चयात् ॥४३॥
सत्तावाचिनि बीजेऽस्मिन्भाति माया त्विदं जगत्
विलुप्तप्रत्ययाकारमेतत्स परिशिष्यते ॥ ४४ ॥
ततो ज्ञानक्रियासारविद्येश्वरसदाशिवाः ।
शक्तित्रिशूले लीयन्ते चतुर्दशकलात्मनि ॥४५॥
ऊर्ध्वाधः सृष्टिवपुषि सर्वं लीनमतः [परम्] ।
इत्थं परस्यां संवित्तौ सर्वं संकुचितं क्रमात् ॥४६॥
अथ वा मनसातीते यत्र क्वापि निरञ्जने ।
षट्त्रिंशत्तत्त्वलहरीकलहातीतगोचरे ॥ ४७ ॥
विश्वात्मनि महामन्त्रे स्वभावे सा विलीयते ।
कुतश्चिन्मथिते धाम्नि दीप्ते केनापि हेतुना ॥४८॥
सर्वं हविरिदं जुह्वन्न दारिद्र्येण पीड्यते ।
पञ्चपञ्चात्मकं विश्वं पञ्चस्पन्दविजृम्भितम्॥४९॥
संकोचयत्परामर्शात्सामान्यस्पन्दकेवलम् ।
अहमि प्रलयं कुर्वन्निदमः प्रतियोगिनः ॥५०॥
पराक्रमपरो भुङ्क्ते स्वभावमशिवापहम् ॥ ५१ ॥

इति षडधिकत्रिंशद्भेदप्रसक्तजगत्तनुः
प्रसरति महाशक्त्युल्लेखविचित्रमहापटी ।
जयति बहुशः स्पन्दाकारा परा चिदनुत्तरा
विमृशत जनाः किं नो भूयः स्वभावविजृ-
म्भितम् ॥

इति श्रीमदाद्यनाथविरचिता अनुत्तरप्रकाशपञ्चाशिका समाप्ता ॥

सेयं काश्मीरभूपालसंश्रितेन प्रकाशिता ।
सता मुकुन्दरामेण सन्मुदेऽस्तु शिवेऽर्पिता ॥

मुंबई—“ तत्त्वविवेचक ” प्रेस.

THE KASHMIR SERIES

OF

TEXTS AND STUDIES.

KASHMIR SERIES OF TEXTS
AND STUDIES.
No. XV.

THE

PARĀ PRĀVESHIKĀ

OF

KṢHĒMARĀJA.

EDITED WITH NOTES
BY
MAHĀMAHOPĀDHYĀYA PAṆDIT MUKUNDA RĀMA SHÂSTRÎ,
OFFICER-IN-CHARGE RESEARCH DEPARTMENT,
JAMMU AND KASHMIR STATE,
SRINAGAR.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT
OF HIS HIGHNESS LIEUT.-GENERAL MAHĀRĀJA
SIR PRATĀP SINGH SĀHIB BAHĀDUR,
G. C. S. I., G. C. I. E.,
MAHĀRĀJA OF JAMMU AND KASHMIR STATE.

BOMBAY:
PRINTED AT THE "TATVA-VIVECHAKA" PRESS.
1918.

श्रीमच्छ्रीकण्ठनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेश्यान्
देशेऽप्यस्मिन्नदृष्टो घुसृणविसरवत्स्तान्मुदे सज्जनानाम् ॥ १ ॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुत्प्लवदायिनम् ॥ २ ॥

ॐ

काश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १९

पराप्रावेशिका

श्रीमन्महामाहेश्वराचार्यवर्य–श्रीक्षेमराजाचार्यविरचिता

श्रीभारतधर्ममार्तण्ड-कश्मीरमहाराज-

श्रीप्रतापसिंहवर-प्रतिष्ठापिते

प्रत्नविद्याप्रकाश-(रिसर्च) कार्यालये

तदध्यक्ष-महामहोपाध्याय-पण्डित-मुकुन्दराम-शास्त्रिणा

उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन

संगृह्य, संशोधन-पर्यायाङ्कन-विवरणादिसंस्करणोत्तरं

पाश्चात्यविद्वत्परिषत्संमताधुनिकसुगमशुद्धरीत्युपन्यासादिसंस्कारैः परिष्कृत्य

मुम्बय्यां

तत्त्वविवेचकाख्य-मुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीता

THE RESEARCH DEPARTMENT JAMMU & KASHMIR STATE

संवत् १९७५ खैस्ताब्दः १९१८

काश्मीर-श्रीनगर

Printed by
Bhiwaji Hari Shinde at the "Tatva-Vivechaka" Press,
Nos. 1, 2, 3, Khetwadi Back Road, Bombay;
and Published by
the Research Department, Srinagar, Kashmir.

ओं नमः शिवाय निखिलतत्त्वात्मने

अथ

पराप्रावेशिका

श्रीमन्महामाहेश्वराचार्यवर्यक्षेमराजविरचिता ।

विश्वात्मिकां तदुत्तीर्णां
हृदयं परमेशितुः ।
परादिशक्तिरूपेण
स्फुरन्तीं संविदं नुमः ॥

परा परापरा अपरा

इह खलु परमेश्वरः प्रकाशात्मा, प्रकाशश्च विमर्शस्वभावः, विमर्शो नाम विश्वाकारेण विश्वप्रकाशेन विश्वसंहरणेन च

(१) ननु परमेश्वरः प्रकाशस्वभावत्वेऽपि किं शान्तब्रह्मवादिनामिव केवलबोधस्वभावः स्यादित्याशङ्क्याह प्रकाशश्चेति ।

(२) विमर्शो हि परिमितापरिमितत्वाभ्यां द्विधा, तत्र परिमितत्वे शून्यादिप्रमात्रुचितेन तेन संवित्प्रकाशस्य परिच्छिन्नत्वं मा भूदित्याश-

अकृत्रिमाहम् इति विस्फुरणम् । यदि[३] निर्विमर्शः स्यात् अनीश्वरो जडश्च प्रसज्येत । एष एव च विमर्शः – चित्, चैतन्यं, स्वरसोदितापरावाक्, स्वातन्त्र्यं, परमात्मनो मुख्यमैश्वर्यं, कर्तृत्वं, स्फुरत्ता, सारो, हृदयं, स्पन्दः इत्यादिशब्दैरागमेषूद्घोष्यते[४],

---

येनाह विमर्शो नामेति, स च विमर्शो विश्वाकारेण सृष्टौ, तत्प्रकाशेन स्थितौ, स्वात्मसात्कारात्मना संहरणेन संहारे च पूर्णाहन्ताचमत्कारात्मक इति यावत् ।

(३) यदीति । विमर्शविकलः सूर्यादिप्रकाशो यथा परापेक्षत्वात् जडपक्षपाती अस्वातन्त्र्यमाश्रितवान् तथैव निर्विमर्शतया संवित्प्रकाशेऽपि प्रसक्तिरापतेदिति भावः ।

(४) इह शैवशासननये संवित्प्रकाशस्य विमर्शप्राधान्यमेव तत्तदागमेषु समुद्घुष्टं, स एव भिन्नभिन्नाभिरागमभाषाभिराम्नायते, यथा – चैतन्यमिति विमर्श एव मुख्यमात्मनो रूपमित्यभिप्रेत्य धर्मवाचिना शब्देन निर्देशः कृतः । तथा स्वरसोदितापरावाक् इति – वक्ति विश्वमभिलपति प्रत्यवमर्शेनेति वाक्, सैव परामर्शान्तराणामाधारभूतत्वात् पूर्णत्वाच्च परा, अत एव अनिरुद्धप्रसरत्वात् अहमिति परिपूर्णचिद्वपुषा सदोदितत्वात् स्वरसोदितेति । तथा स्वातन्त्र्यमिति, स्वातन्त्र्यं च संयोजनवियोजनादिरूपं स्वस्मात् बहिष्कृतमिदन्तापदं स्वात्मनि संयोजयति, संयोज्यापि वियोजयति, शून्यादिभूमिकायां च न्यग्भावयति, – इत्यादिलक्षणत्वेन जडाद्वैलक्षण्याधायीति । तथा ऐश्वर्यमिति विश्वसर्गादावनन्यापेक्षित्वं न तु अस्य मायागर्भाधिकारिणो ब्रह्मादेरिव परेच्छावशवर्तित्वेन नियतिनियन्त्रणावत्त्वम् इति । तथा कर्तृत्वमिति, एतदेव कर्तृत्वं यत् अलौकिकेन

अत एव अकृत्रिमाहमिति-सतत्त्वः स्वयंप्रकाशरूपः परमेश्वरः पारमेश्वर्या शक्त्या शिवादि-धरण्यन्तजगदात्मना स्फुरति प्रकाशते च। एतदेव अस्य जगतः कर्तृत्वमजडत्वं च, जगतः कार्यत्वमपि एतदधीनप्रकाशत्वमेव, एवंभूतं जगत्

कार्यकारणभावेन स्वान्तःप्रकाशैक्येन स्थितस्य शिवादेः पृथिव्यन्तस्य विश्वस्य इदन्तया समुन्मीलनं योगिनिर्माणवत् इति। तथा स्फुरत्तेति स्फुरणसंबन्धः, तद्धटादेर्नास्ति, तथात्वे हि सर्वेषां सदैव घटादिकं प्रस्फुरेत् न कस्यचिद्वेति सर्वसर्वज्ञता तद्विपर्ययो वा प्रसज्येत, अतो मम स्फुरतीति मदीयं स्फुरणमाविष्ट इत्यर्थः। सारमिति अतुच्छं रूपं, सा परमेश्वरस्य विमर्शशक्तिरेवेति। हृदयमिति विश्वप्रतिष्ठास्थानत्वात्। स्पन्द इति अचलस्य चित्प्रकाशस्य चलत्ताभासनं, यत् तत्र अनतिरिक्तत्वेपि अतिरिक्ततयेव विश्वावभासनमित्यर्थः।

(५) विमर्शशक्तिमाहात्म्यादेव परमेश्वरो विश्ववैचित्र्यप्रथात्मना स्वात्मनैव समुल्लसतीति प्रतिपादयन् विमर्शशक्तिलक्षणमुपसंहरति अत एवेति। मायाप्रकृत्यादेर्जगत्सृष्टौ कारणान्तरस्य भेदाभेदविकल्पैरुपहतत्वात् न तत्कर्तृत्वमुपपद्यते इति भावः।

(६) यद्विश्वात्मना परमेश्वरस्य प्रस्फुरणम् इदमेव पारमार्थिकं कर्तृत्वं, तत्स्फुरणात्मनैव प्रकाश्यमानस्य विश्वस्याजडभावोऽपि स्यादित्याह एतदेवेति।

(७) ननु जगद्विषयं कीदृक् कार्यत्वं भेदेनाभेदेन वा, भिन्नत्वे त-

---

पं० २० ख० पु० भिन्नत्वे हि इति पाठः।

प्रकाशरूपात् कर्तुर्महेश्वरादभिन्नमेव, भिन्नवेद्यत्वेऽप्रकाशमानत्वेन प्रकाशनायोगात् न किंचित्स्यात्, अनेनं च जगता अस्य भगवतः प्रकाशात्मकं रूपं न कदाचित् तिरोधीयते, एतत्प्रकाशनेन प्रतिष्ठां लब्ध्वा प्रकाशमानमिदं जगत् आत्मनः प्राणभूतं कथं निरोद्धुं शक्नुयात्, कथं च तन्निरुध्य स्वयमवतिष्ठेत, अतश्चास्य वस्तुनः साधकमिदं बाधकमिदं प्रमाणमित्यनुसंधानात्मकसाधकबाधकप्रमातृरूपतया चास्य सद्भावः, तत्सद्भावे किं प्रमाणम्? – इति वस्तुसद्भावमनुमन्यतां, तादृक्स्वभावे किं प्रमाणम्? – इति प्रष्टृरूपतया च पूर्वसिद्धस्य

त्कर्तुः परमेश्वरस्य स्वातन्त्र्यं नाम विघटेत, अभिन्नत्वे कथं तत् इत्याशङ्क्याह जगत इति। अस्य जगतः परप्रकाशं विना अचेत्यमानत्वात् स्वात्मलाभो दुर्घटः, तदाश्रयत्वावलम्बनात् तत् प्रकाशशरीरतामेतीत्येतदेव कार्यत्वं, केवलं मायास्वातन्त्र्येण भेदोद्भासनादभिन्नत्वेऽपि भिन्नव्यवहार इति भावः।

(८) अभेदत्वे विश्वं भातुं प्रगल्भेत, अन्यथा स्वरूपशून्यत्वात् विश्वव्यवहारो हानादानादिरूपो विनश्येदित्याशयेनाह भिन्नवेद्यत्वे इति।

(९) ननु यदि जगत् परमेश्वरादभिन्नं तत् प्रकाशैकरूपस्य जगतो भासमानत्वात् परमेश्वरे सारूप्यभेदो दुर्वारः, तेनापि तस्य तिरोधीयमानत्वं भवेदिति शङ्कां निवारयन्नाह अनेनेति। प्रत्युत स्वात्मनि लब्धेऽपि प्रकाशावरणात् स्वयमेव नष्टं भवेदित्यर्थः।

(१०) ज्ञापकादिकारकाणि पूर्वसिद्धे ईश्वरे व्यापरीतुं न शक्नुवन्ती-

महेश्वरस्य स्वयंप्रकाशत्वं सर्वस्य स्वसंवेदनसिद्धम् । किं च[11] प्रमाणमपि यमाश्रित्य प्रमाणं भवति तस्य प्रमाणस्य तदधीनशरीरप्राणनीलसुखादिवेद्यं चातिशय्य सदा भासमानस्य वेदकैकरूपस्य सर्वप्रमितिभाजः सिद्धौ अभिनवार्थप्रकाशस्य प्रमाणवराकस्य कश्चोपयोगः[12] । एवं च [13]शब्दराशिमयपूर्णाह-

---

स्याशयं गृहीत्वा तद्विध्यादिकर्तुः प्रमातुरपि ताद्रूप्येण सत्त्वात् न तत्सिद्धिः प्रमाणाधीना, इत्यतः स्वप्रकाशत्वं तस्यानुभवसिद्धमित्याह अतश्चास्येति

(११) संवित्प्रकाश एव सर्वजीवितभूतो मायीयव्यवहारे प्रमाणं कल्पयति इत्यतः पूर्वसिद्धत्वात् तत्र प्रमाणं किमपि नोपयुज्यते इत्याह किं चेति । परप्रकाशापेक्षयान्यत्सर्वं जडतया स्वात्मानमपि भासयितुमशक्तं कथं परं व्यवस्थापयितुमुद्यच्छेदिति यावत् ।

(१२) कश्च उपयोग इति, प्रमाणं नाम अभिनवाभासरूपं प्रमातरि प्रमितिलक्षणां विश्रान्तिं विदधत् प्रमाणं भवति, प्रमाता च नित्यावभासितत्वादविच्छिन्नाभासः सर्वाः प्रमितीः स्वात्मनि अन्तर्मुखरूपे भजते, तत् तस्मिन् कथमभिनव आभास उपयुज्यताम् तत्प्रमितिश्च कुत्रान्यत्र विश्राम्यतु, तस्मात् देहप्राणनीलसुखादिवेद्य एव प्रमाणोपयोगः न तु प्रमाणजीवितभूते परमेश्वरे । तदुक्तम्

> ‘ प्रमाणान्यपि वस्तूनां जीवितं यानि तन्वते ।
> तेषामपि परो जीवः स एव परमेश्वरः ॥ ’

इति ।

(१३) शब्दराशिमयेति, शब्दराशिः – अकारादि-हकारान्तो वर्णस-

न्तापरामर्शसारत्वात् परमशिव एव षट्त्रिंशत्तत्त्वात्मकः प्रपञ्चः। षट्त्रिंशत्तत्त्वानि च,—१ शिव २ शक्ति ३ सदाशिव ४ ईश्वर ५ शुद्धविद्या ६ माया ७ कला ८ विद्या ९ राग १० काल ११ नियति १२ पुरुष १३ प्रकृति १४ बुद्धि १५ अहंकार १६ मनः १७ श्रोत्र १८ त्वक् १९ चक्षुः २० जिह्वा २१ घ्राण २२ वाक् २३ पाणि २४ पाद २५ पायु २६ उपस्थ २७ शब्द २८ स्पर्श २९ रूप ३० रस ३१ गन्ध ३२ आकाश ३३ वायु ३४ वह्नि ३५ सलिल ३६ भूमयः, इत्येतानि।

अथैषां लक्षणानि। तत्र शिवतत्त्वं नाम इच्छा-ज्ञान-क्रियात्मककेवलपूर्णानन्दस्वभावरूपः परमशिव एव। अस्य जगत् स्रष्टुमिच्छां परिगृहीतवतः परमेश्वरस्य प्रथमस्पन्द ए-

---

मूहो गर्भीकृतसमस्तविश्वस्तन्मयो योऽनन्यमुखप्रेक्षित्वस्वातन्त्र्यविश्रान्तिरूपः 'अहमेव प्रकाशात्मा प्रकाशे' इत्येवं-रूपः पूर्णाहन्तापरामर्शः स एव सारम् अतुच्छं रूपं यस्य तस्य भावस्तस्माद्धेतोरित्यर्थः।

(१४) षट्त्रिंशत्तत्त्वानि, तस्य भावस्तत्त्वम् इति भिन्नानां वर्गाणां वर्गीकरणनिमित्तं यदेकमविभक्तं भाति तत्तत्त्वम्, यथा गिरिवृक्षपुरप्रभृतीनां नदीसरःसागरादीनां च पृथिवीरूपत्वमब्रूपत्वं चेति

(१५) सर्वप्रमातॄणामन्तः परिस्फुरत्पूर्णाहन्ताचमत्कारमयं सर्वतत्त्वोत्तीर्णं सकलतत्त्वराशिगतसृष्टिसंहारशतसहस्रप्रतिबिम्बनसहिष्णु महाप्रकाशवपुः शिवतत्त्वम्।

वेच्छाशक्ति[16]तत्त्वम्, अप्रतिहतेच्छत्वात्, सदेवाङ्कुरायमाणमिदं जगत् स्वात्मनाहन्तयाच्छाद्य स्थितं रूपं सदाशिवतत्त्वम्[17], अङ्कुरितं जगदहन्तयावृत्य स्थितमीश्वर[18]तत्त्वम्, अहन्तेदन्तयोरैक्यप्रतिपत्तिः शुद्ध[19]विद्या, स्वस्वरूपेषु भावेषु भेदप्रथा माया[20], यदा तु परमेश्वरः पारमेश्वर्या माया[21]शक्त्या स्वरूपं

---

(१६) तस्यैव स्वस्वातन्त्र्यमाहात्म्यात् बहिरुल्लिलसिषया परानन्दचमत्कारोद्रेकात् अहमिति परामर्शः शक्तितत्त्वम् ।

(१७) यदा परमेश्वरः शुद्धचिन्मात्राधिकरण एवाहमित्यंशे इदमंशमुल्लासयति तदा तस्य प्रोन्मीलितमानचित्रकल्पभावराशिविषयत्वेन अस्फुटत्वात् इच्छाप्रधानं सदाशिवतत्त्वम् ।

(१८) स्फुटीभूते च इदमंशे यदाहमंशं निषिञ्चति तदा ज्ञानशक्तिप्रधानमीश्वरतत्त्वम् । अनयोः प्रोक्तयोस्तत्त्वयोरहंविमर्शस्याविशेषेऽपि इदमंशस्य ध्यामलत्वाध्यामलत्वाभ्यां विशेषः ।

(१९) यदा पुनः प्ररूढभेदभावराशिगतेदमंशस्फुरणे चिन्मात्रगतत्वेनाहमंशः समुल्लसति भेदाद्वैतवादिनामिव ईश्वरस्य यः समधृततुलापुटन्यायेनाहमिदमिति परामर्शः तत् क्रियाशक्तिप्रधानं विद्यातत्त्वम् ।

(२०) मायेति, दुष्करतमवस्तुसंपा इति दनाप्रतीघातरूपा अचिद्रूपे शून्यादौ च प्रमातृताभिमानं प्ररूढं कुर्वती चिदेकमयानपि भावान् भेदेन आभासयन्ती स्वरूपं तिरोदधती कलादिक्षित्यन्तानां भावानामुपादानकारणं च माया ।

(२१) मायाशक्त्येति, स्वातन्त्र्यापरपर्यायया ।

पं० ६ क० पु० संकुचितग्राह्यग्राहकतामिति पाठः ।

गृहयित्वा संकुचितग्राहकतामश्नुते तदा पुरुषसंज्ञः, अयमेव मायामोहितः कर्मबन्धनः[22] संसारी[23], परमेश्वरादभिन्नोऽपि अस्य मोहः परमेश्वरस्य न भवेत्—इन्द्रजालमिव ऐन्द्रजालिकस्य स्वेच्छया संपादितभ्रान्तेः, विद्याभिज्ञापितैश्वर्यस्तु[24] चिद्घनो मुक्तः[25] परमशिव एव । अस्य सर्वकर्तृत्वं सर्वज्ञत्वं पूर्णत्वं नित्यत्वं व्यापकत्वं च, शक्तयोऽसंकुचिता अपि संकोचग्रहणेन कला-विद्या-राग-काल-नियतिरूपतया[26] भवन्ति । अत्र कला[27]-

---

(२२) कर्मबन्धन इति, कर्माणि स्वात्मनो बन्धकानि अभिमन्यमानः।

(२३) संसारीति, संसरति इत्यतः संसारी, देहोऽपि स्वरूपसादृश्यं बाल्ययौवनादिषु अनुवर्तयन् संसरतीव, बुद्ध्यादेस्तु जन्मान्तरेऽपि संसरणम् ।

(२४) विद्याभिज्ञापितैश्वर्यस्तु इति, विद्यया स्वरूपप्रकाशनशक्त्या अभिज्ञापदं प्रापितमैश्वर्यं यस्य, अत एव चिद्घनः शरीराद्यपि विश्वमचिद्रूपव्यामिश्रणशून्यं संवेदनमेव अभिमन्यमान इत्यर्थः ।

(२५) मुक्त इति, पुनर्जन्मबन्धविरहात् देहे स्थितेऽपि मुक्त इति व्यपदेशयोग्य इति भावः । पतिते तु परमशिवस्वरूप एवेति ।

(२६) नियतिरूपतया भवन्तीति, यथा राज्ञापहृतसर्वस्वस्य अनुकम्पया जीवनार्थं किंचित् स्तोकं धनं दीयते तथैव अणुत्वमापन्नस्य बोधस्य अपहृतसर्वज्ञत्वादेस्तत्स्थाने किंचित्कर्तृत्तादिपरमार्थं कलादिकं वितीर्यते इति भावः ।

(२७) कलेति, यया सर्वं कर्तुमसमर्थः किंचिदेव घटादिकं करोतीति।

नाम अस्य पुरुषस्य किंचित्कर्तृताहेतुः, विद्या[२८] किंचिज्ज्ञत्वकारणम्, रागो[२९] विषयेष्वभिष्वङ्गः, कालो हि भावानां भासनाभासनात्मकानां क्रमो[३०]ऽवच्छेदको भूतादिः, नियतिः[३१] ममेदं कर्तव्यं नेदं कर्तव्यम् इति नियमनहेतुः, एतत् पञ्चकम् अस्य स्वरूपावरकत्वात् कञ्चुकमिति[३२] उच्यते, महदादि-पृथिव्यन्तानां तत्त्वानां मूलकारणं प्रकृतिः, एषा च सत्त्वरजस्तमसां[३३] सा-

(२८) विद्येति, यया किंचिदेव पुरोवर्ति घटादिकं जानाति न पुनर्दूरव्यवहितं वस्तु इति ।

(२९) राग इति, अपूर्णमन्यतया इदं मम उपयुज्यते, भूयासं, मा कदाचित् न भूवम् इत्येवंरूपः ।

(३०) क्रमोऽवच्छेदक इति, आज्ञासिषं जानामि ज्ञास्यामि इति, अकार्षं करोमि करिष्यामि इति ज्ञानक्रियास्वरूपेण भावानपि तथा कलयन् अवच्छिनत्ति इति ।

(३१) नियतिरिति, ममेदं कर्तव्यमिति, इदं स्वर्गादिफलकमश्वमेधादिकमेव मया कर्तव्यं न निरयादिफलकं ब्रह्महननादि इति । अथ च नियतादेव कारणान्नियतमेव कार्यमित्यादि बहुविधं नियतिरूपम् ।

(३२) कञ्चुकमिति, स्वरूपाद्व्यतिरिक्तमपि अव्यतिरिक्ततया पूर्णसंवित्स्वरूपमाच्छाद्य स्थितमित्यर्थः ।

(३३) सत्त्वरजस्तमसां सुखदुःखमोहात्मकानां प्रकाशक्रियानियमनस्वभावानां साम्यावस्था सामान्यं रूपं, यत्रैषामङ्गाङ्गिभावो नोपलभ्यत इत्यर्थः ।

म्यावस्था अविभक्तरूपा, निश्चयकारिणी[३४] विकल्पप्रतिबिम्ब[३५]-
धारिणी बुद्धिः, अहंकारो नाम – ममेदं न ममेदमित्यभिमान-
साधनम्, मनः संकल्पसाधनम्, एतत्त्रयमन्तःकरणम्[३६]। शब्द-
स्पर्श-रूप-रस-गन्धात्मकानां विषयाणां क्रमेण ग्रहणसाधनानि
श्रोत्र-त्वक्-चक्षुर्जिह्वा-घ्राणानि पञ्च ज्ञानेन्द्रियाणि। वचना-
दान-विहरण-विसर्गानन्दात्मक्रियासाधनानि परिपाट्या वाक्-
पाणि-पाद-पायूपस्थानि पञ्च कर्मेन्द्रियाणि। शब्द-स्पर्श-रूप-
रस-गन्धाः सामान्याकाराः पञ्च तन्मात्राणि[३७]। आकाशम-
वकाशप्रदम्, वायुः संजीवनम्, अग्निर्दाहकः पाचकश्च,
सलिलमाप्यायकं द्रवरूपं च, भूमिर्धारिका,

---

(३४) निश्चयकारिणीति, इदमेतादृक् इत्येवंरूपो निश्चयः।

(३५) सत्त्वप्रधानत्वेन स्वच्छतया प्रतिबिम्बग्रहयोग्यत्वात् विकल्प-प्रतिबिम्बधारिणीति भावः।

(३६) अन्तर्वेद्यस्य सुखादेर्ग्रहणसाधनत्वात् अन्तःकरणम्। अङ्गाङ्गिभावेन गुणानां कार्यं, वक्ष्यमाणस्य भूतेन्द्रियादेः कार्यवर्गस्य च कारणम्।

(३७) तन्मात्राणीति, तदेव नाधिकं तत्र अन्यदस्तीति तन्मात्र-शब्देनावान्तरविशेषरहिता शब्दाद्या उच्यन्ते।

'यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः ।
तथा हृदयबीजस्थं विश्वमेतच्चराचरम् ॥'

इत्याम्नायनीत्या पराभट्टारिकारूपे हृदयबीजेऽन्तर्भूतमेतज्जगत् । कथं ?-यथा घटशरावादीनां मृद्विकाराणां पारमार्थिकं रूपं मृदेव, यथा वा जलादिद्रवजातीनां विचार्यमाणं व्यवस्थितं रूपं जलादिसामान्यमेव भवति, तथा पृथिव्यादिमायान्तानां तत्त्वानां सतत्त्वं मीमांस्यमानं सदित्येव भवेत्, अस्यापि पदस्य निरूप्यमाणं धात्वर्थव्यञ्जकं प्रत्ययांशं विसृज्य प्रकृतिमात्ररूपः सकार एवावशिष्यते, तदन्तर्गतमेकत्रिंशत्तत्त्वम्, ततः परं शुद्धविद्येश्वर-सदाशिवतत्त्वानि ज्ञान-क्रियासाराणि शक्तिविशेषत्वात् औकारेऽभ्युपगमरूपेऽनुत्तरशक्तिमयेऽन्तर्भूतानि । अतः परमूर्ध्वाधः सृष्टिरूपो विसर्जनीयः, एवं-भूतस्य हृदयबीजस्य महामन्त्रात्मको विश्वमयो विश्वोत्तीर्णः परमशिव एवोदयविश्रान्तिस्थानत्वान्निज-

(३८) यथेति, यथा वटबीजे तत्समुचितेनैव वपुषा अङ्कुरपत्रफलानि तिष्ठन्ति एवं नानाविधतनुकरणादिवैचित्र्यशालि विश्वमिदं हृदयबीजान्तःस्थितं । मयूराण्डरसे सर्वशिख्यवयवानुप्रविष्टवर्होपवर्हादिपूर्णरेखादिवैचित्र्यशिल्पकल्पनाकौशलवत् अवधानधनैः सूक्ष्मेक्षिकयावधार्यम् ।

(३९) विश्वमयो विश्वोत्तीर्ण इति, सर्वाकारत्वं निराकारत्वं चात्र क्रमेण हेतुः ।

स्वभावः । ईदृशं हृदयबीजं तत्त्वतो यो वेद समाविशति च स परमार्थतो दीक्षितः प्राणान् धारयन् लौकिकवद्वर्तमानो जीवन्मुक्त एव भवति, देहपाते परमशिवभट्टारक एव भवति ॥

---

(४०) दीक्षित इति, तिलाज्याहुतिवर्जितमेतत्परिज्ञानमेव तत्त्वतो दीक्षा इति भावः ।

इति श्रीमन्महामाहेश्वराचार्यवर्यक्षेमराजविरचिता
पराप्रावेशिका समाप्ता ॥

सद्विद्यानां संश्रये ग्रन्थविद्वद्-
व्यूहे ह्रासं कालवृत्त्योपयाते ।
तत्तत्सद्धर्मोद्दिधीर्षैकतान-
सत्प्रक्षौजःशालिना कर्मवृत्त्यै ॥ १ ॥

श्रीमत्कश्मीराधिराजेन मुख्यै-
र्धर्मोद्युक्तैर्मन्त्रिभिः स्वैर्विविच्य ।
प्रत्यष्ठापि ज्ञानविज्ञानगर्भ-
ग्रन्थोद्धृत्यै मुख्यकार्यालयो यः ॥ २ ॥

तत्राजीवं निर्विशद्भिर्मुकुन्द-
रामाध्यक्षत्वाश्रितैः सद्भिरेषः ।
पूर्त्या शुद्ध्या व्याख्यया संस्कृतः स्तात्
पूर्णो ग्रन्थः श्रेयसे सज्जनानाम् ॥ ३ ॥

(तिलकम्)

श्रीस्वात्मशिवार्पणं शिवदं च बोभवीतु अध्येतृश्रोतृविमर्ष्टृणाम् ॥

काव्यमाला १३.

सांबकविप्रणीता ।

साम्बपञ्चाशिका ।

क्षेमराजकृतया टीकया समेता ।

मूल्यं ४ आणकाः ।

KÂVYAMÂLÂ. 13.

THE SÂMBAPANCHÂSIKÂ

OF

SÂMBA.

WITH

The commentary of Kshemarâja.

EDITED BY

PAṆḌIT KEDÂRNÂTHA

AND

WÂSUDEVA LAXMAṆ SHÂSTRÎ PAṆASHÎKAR.

Second Edition.

PUBLISHED BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR "NIRṆAYA-SÂGAR" PRESS.

BOMBAY.

PRINTED BY B. R. GHÂNEKAR AT THE "NIRṆAYA-SÂGAR" PRESS, FOR THE PUBLISHER.

1910.

Price 4 Annas.

काव्यमाला।

श्रीसाम्बप्रणीता
साम्बपञ्चाशिका।[1]

रा[2]जानकश्रीक्षेमराजकृतया टीकया समेता।

पुष्णन्देवानमृतविसरैरिन्दुमाप्याव्य सम्य-
ग्भाभिः स्वाभी रसयति रसं यः परं नित्यमेव।
क्षीणं क्षीणं पुनरपि च तं पूरयत्येवमीदृ-
ग्दोलालीलोल्लसितहृदयं नौमि चिद्भानुमेकम्॥
एतदावेशवैवश्यप्रोन्मिषद्धिषणा वयम्।
विमृशामो मनाक्छ्रीमत्साम्बपञ्चाशिकास्तुतिम्॥

---

१. इयं सूर्यस्तुतिर्भगवतो वासुदेवस्य पुत्रेण वृष्णिवंशभूषणेन श्रीसाम्बेन प्रणीतेति टीकाकारः प्रारम्भे समाप्तौ च वदति. वाराहपुराणे चैकसप्तत्युत्तरशततमेऽध्याये—'ततः साम्बो महाबाहुः कृष्णाज्ञप्तो ययौ पुरीम्। मथुरां मुक्तिफलदां रवेराराधनोत्सुकः॥'—'साम्ब पञ्चाशकैः श्लोकैर्वेदगुह्यपदाक्षरैः। यत्स्तुतोऽहं त्वया वीर तेन तुष्टोऽस्मि ते सदा॥' इत्यादिश्लोकैः साम्बस्य पञ्चाशच्छ्लोकात्मकरविस्तुतिनिर्माणं प्रतीयते. स्तुतिस्तु तत्र नास्ति. सा च कदाचिदियमेव स्यात्. २. अयं टीकाकारो राजानकक्षेमराजस्तु कश्मीरेषु खिस्ताब्दीयैकादशशतकप्रारम्भ आसीत्, यतोऽयमात्मानं श्रीमदाचार्याभिनवगुप्तशिष्यत्वेन वर्णयति. ग्रन्थाश्चैतत्कृता एते ज्ञायन्ते—(१) परमार्थसंग्रहवृत्तिः, (२) प्रत्यभिज्ञाहृदयम्, (३) भैरवानुकरणस्तोत्रम्, (४) साम्बपञ्चाशिकाटीका, (५) स्तवचिन्तामणिवृत्तिः, (६) स्पन्दनिर्णयः(?), (७) स्पन्दसंदोहः(?), (८) स्वच्छन्दोद्द्योतः. इयं साम्बपञ्चाशिकाटीका प्रत्यभिज्ञाशास्त्रानुसारिणी वर्तते. तत्र प्रमापकत्वेन धृता एते—(१) आम्नायः, (२) कालिकाक्रमः, (३) कालोत्तरम्, (४) नन्दिशिखा, (५) भर्गशिखा, (६) भैरवानुकरणस्तोत्रम्, (७) विज्ञानभैरवः, (८) शिवसूत्रम्, (९) श्रीपूर्वः, (१०) श्रुतिः, (११) स्वच्छन्दः. एतन्मुद्रणमभिलषद्भिरस्माभिः [illegible]तकद्वयमस्या उपलब्धम्. तत्र प्रथमं सटीकं शुद्धमेकोनविंशतिपत्रात्मकं केरलीयस[illegible]ावशास्त्रिभिः काश्मीरेभ्यः समानीतं क-संज्ञकम्, अपरं च जयपुरराजगुरुभट्टलक्ष्मीदत्तसूनुभट्टश्रीदत्तशर्मणां संग्रहात्प्राप्तं मूलमात्रं शुद्धं षट्पत्रात्मकं ख-संज्ञकं ज्ञेयम्. एतदाश्रयेणैतन्मुद्रणं संपन्नमिति शिवम्.

सोऽयं परामृतरसो रसज्ञैरिह रस्यताम् ।
आयुष्याज्यामृतस्पर्शः शतपद्या हि शान्तये ॥

समस्तागममहाम्नायरहस्यविन्महायोगी(गि)सहस्रसंप्रदायसंपूर्णः श्रीवासुदेवस्य भगवतः पुत्रः श्रीसाम्बः स्वात्मविवस्वत्स्तुतिं जगतोऽनुग्रहाय वक्तुमुपक्रमते—

शब्दार्थत्वविवर्तमानपरमज्योतीरुचो गोपते-
रुद्गीथोऽभ्युदितः पुरोऽरुणतया यस्य त्रयीमण्डलम् ।
भास्वद्वर्णपदक्रमैरिततमः सप्तस्वराश्वैर्विय-
द्विद्यास्यन्दनमुन्नयन्निव नमस्तस्मै परब्रह्मणे ॥ १ ॥

तस्मै परस्मै सर्वोत्कृष्टाय विश्वपूरणादिकर्त्रे च । अत एव चाभावशान्तब्रह्मचित्रब्रह्मादिसर्वब्रह्मकोडीकर्त्रे ब्रह्मणे बृहते व्यापकाय बृंहणाय च विश्वकर्त्रे चिदात्मने नमः । देहादिप्रमातृताप्रशमनेन तदेवाविशामीत्यर्थः । यस्य ब्रह्मणः संबन्धि ऊर्ध्वमशेषविश्वाभेदात्मतया उत्कृष्टतया गीयते विमृश्यत इत्युद्गीथः प्रथमोन्मेषात्मशब्दब्रह्मरूपः प्रणवो ध्वनिः । देवतास्तुतिकर्मप्रधानसामर्ग्यजुर्वेदाख्या त्रय्येव शाखा प्रपञ्चकोडीकृतसमस्ताम्नायवाक्यैकवाक्यताव्याप्त्या मण्डलम् । अतश्चैतत्सर्वासां विद्यानां मन्त्रशास्त्रविज्ञानानां स्यन्दनमास्पदं प्रसवकारणं च कर्मभूतं च वियत्पराकाशमुन्नयन्नुल्लासयंस्तन्मयत्वमापादयन्निव पुरः प्रथममरुणतयातिदीप्तत्वेनोदितः स्वयमुन्मिषितः । वियन्मयस्याप्यस्य दीप्तस्योन्मेषावष्टम्भपुरःसरं तथा स्फुरणादुन्नयन्निवेत्युक्तम् । एतच्च त्रयीमण्डलं भास्वद्भिः प्रोद्गीथारुणिम्ना स्फुरितैर्वर्णपदक्रमैरक्षरवाचकतदानुपूर्वीभिरीरितं ध्वस्तं तमोऽज्ञानं येन तादृक् । उच्चारणपदार्थवाक्यार्थप्रतिपत्तिषु परमचिदभेदविश्रान्तिदमित्यर्थः । केन वियदुन्नयन् । सप्त ये स्वराः स्वयं राजमाना विश्वाक्षेपिणो वर्णाः पश्यन्त्यादिप्रवर्तनप्राणितकल्पाः षड्जादिध्वनिविमर्शास्त एव सर्वत्राशुसंचारित्वादश्वास्तैः । यस्य ब्रह्मणः कीदृशस्य । गोपतेः परादिवाक्प्रभोर्मरीचिचक्रेश्वरस्य च । अत एव शब्दार्थत्वेन नानालौकिकेतरशब्दतदर्थतत्संबन्धैर्विचित्रतया वर्तमानं स्वातन्त्र्यादेतद्वैचित्र्याभासात्म यत्परं ज्योतिः शाक्तं वीर्यं तेन च रुग्दीप्तिर्यस्य । बाह्यस्यापि सूर्यस्य 'ज्ञानशक्तिः परा ह्येषा तपत्यादित्यविग्रहा' इत्याम्नायनीत्या परब्रह्मप्रतिबिम्बकल्पस्य प्रणवव्याप्तिकोऽरुणः पूर्वमुदितः । त्रयीव्याप्तिकं मण्डलमितरविद्याव्याप्तिकं स्यन्दनं च कर्म भास्वद्वर्णैः पदक्रमैर्देदीप्यमानचरणविन्यासैरीरिततमसो ये सप्तस्वरव्याप्तिका अश्वास्तैर्वियदुत्क्षिपति । अथ च विचित्रवाच्यवाचकात्मजगद्वृत्तेश्चिच्चक्रेश्वरस्योद्गीथः शक्त्यङ्कुरोन्मेषो दीप्तो ब्रह्मविष्णुरुद्रजाग्रत्स्वप्नसुषुप्तिब्रह्ममूलमायाण्डादित्रयीमण्डलम् विश्वव्यापकम् । वेदनानादिधर्मस्य परमात्वबोधनेत्याद्याम्नायनिरुक्तोन्मनाशक्त्याख्या विद्यास्यन्दनं स्वरैर्विचित्रैर्मन्त्रैर्ध्वनिभिरुन्नयन्निव प्रथममुदितः । किं कृत्वा । भास्वतां

वर्णानामकारादिमात्राणां पदानां बिन्द्वादिविश्रान्तीनां क्रमेण परिपाट्या ईरितं तमः समनान्तं पाशजालं यत्र ॥

एवं सामान्यव्याप्त्या परमार्कं स्तुत्वा देहस्थमध्यनाडीव्याप्त्या स्तौति—

ओमित्यन्तर्नदति नियतं यः प्रतिप्राणि शब्दो
वाणी यस्मात्प्रसरति परा शब्दतन्मात्रगर्भा ।
प्राणापानौ वहति च समौ यो मिथो ग्राससक्तौ
देहस्थं तं सपदि परमादित्यमाद्यं प्रपद्ये ॥ २ ॥

तं परमादित्यं परब्रह्मस्वरूपमेव देहस्थितं मध्यनाडीगतप्राणब्रह्मनिविष्टं आद्यं विश्वचित्रभित्तिभूतं सपदि प्रपद्ये अभिसंध्यवधानेन समाविशामि । कं तमित्याह—य ओमितिशब्दः क्रोडीकृताशेषशब्दनात्मनादरूपो महाप्रणवः प्रतिप्राणि सर्वभूतेषु नियतमविच्छिन्नप्रवाहेणान्तर्नदति परा वागात्मस्वरूपं विमृशन्स्थितः । यस्माच्च शब्दतन्मात्रगर्भा आसूत्रितक्रमादि(कादि)क्षान्तशब्दसामान्यमात्राविभागज्योतिर्मयी परा द्वितीया वाणी पश्यन्ती प्रसरत्युन्मिषति । यश्च मिथो ग्राससक्तावन्योन्यकवलनपरौ समौ समानभूमिकारूढौ प्राणापानौ वहति । उदानवह्न्यात्मनिजमहाज्योतिर्मयौ करोति ॥

एवं महाव्याप्त्या सूक्ष्मव्याप्त्या चानवच्छिन्नं मध्यधामस्थं च चिदर्कं नुत्वा प्रपञ्चव्याप्त्यापि स्तौति—

यस्त्वक्चक्षुःश्रवणरसनाघ्राणपाण्यङ्घ्रिवाणी-
पायूपस्थस्थितिरपि मनोबुद्ध्यहंकारमूर्तिः ।
तिष्ठत्यन्तर्बहिरपि जगद्भासयन्द्वादशात्मा
मार्तण्डं तं सकलकरणाधारमेकं प्रपद्ये ॥ ३ ॥

मृतानां वेद्यैकरूपतया शवप्रायाणामण्डानां देहप्राणादिपिण्डानामयमनुप्राणको मार्तण्डश्चिद्भानुस्तमेकमद्वितीयमपि प्रपञ्चव्याप्त्या सकलानां प्रमातॄणां सकलानि करणानि च त्रयोदशकरणानि च तेषामाधारमनुप्राणकमविभिन्नमाश्रयं प्रपद्ये । यस्त्वगाद्यहंकारान्तस्वीकृतत्रयोदशेन्द्रियमूर्तिः । अतश्चान्तरहंकारात्मा वेदग्राहकरूपः बहिश्चाध्यवसायादिव्यापारबुद्ध्यादिकरणद्वादशात्मा ग्राह्यरूपं जगद्भासयंस्तिष्ठतीति स्थूलदृशार्थः । रहस्यदृशा तु—गृहीतसर्वेन्द्रियमूर्तिरपि यः सृष्ट्यादिमरीचिचक्रचित्रसंचारचातुर्योद्द्वादशात्मा एक एव चिदर्कोऽन्तर्बहिश्च जगत्कालानलादि व्योमकलान्तं विश्वं भासयंस्तुर्यधामात्मनिजभासा चक्रमयत्वमापादयन्सर्वकरणान्याधारतया निजौजोज्वलनज्वलितान्याश्रित्य स्थितस्तं प्रकर्षेण प्रपद्ये । निजव्युत्थानं साक्षात्कुर्वन्स्थितोऽस्मीत्यर्थः ॥

१. 'प्रभवति' ख.

प्रपञ्चव्याप्त्याखिलेन्द्रियाधारे स्तुतेऽपि भगवति प्रकाशविमर्शपरमार्थे तद्विमर्शप्रसरसरणिं वाणीं स्तौति—

याँ सा मित्रावरुणसदनादुच्चरन्ती त्रिषष्टिं
वर्णा[2]नत्र प्रकटकरणैः प्राणस[3]ङ्घात्प्रसूतान्।
तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धिसंस्थां
वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये ॥ ४ ॥

'अविभागात्तु पश्यन्ती सर्वतः संहृतक्रमा। स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ॥' इत्यादिना लक्षितां प्रथममादावुदितामुन्मिषितां तां स्वरूपज्योतीरूपां पश्यन्त्याख्यां तदनु तामेव बुद्धिसंस्थां बुद्ध्यभ्यासं प्राप्ताम्। 'केवलं बुद्ध्युपादानात्क्रमरूपानुपातिनी। प्राणवृत्तिमतिक्रम्य मध्यमा वाक्प्रवर्तते ॥' इत्यादिलक्षिताम्। मध्ये भवत्वान्मध्यमां मध्येऽन्तःकरणे वर्तमानाम्। तदनु वक्त्रे वदने करणेषु जिह्वामूलजिह्वामध्यादिषु विशदां निर्मलाम्। 'स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा। वैखरी वाक्प्रयोक्तॄणां प्राणवृत्तिनिबन्धना ॥' इत्यादिना लक्षिताम्। विखरे शरीरे भवत्वात्तदाख्यां वाचं प्रपन्नोऽस्मि। कां तामित्याह—या सा मित्रावरुणसदनादग्नीषोममयात्मनः परावाक्प्रधानान्मध्यधाम्नोऽकारादींस्त्रिषष्टिं वर्णानुच्चरन्ती आसूत्रितक्रमतया भेदाभेदाभ्यां भेदेन च विमृशन्ती। केनोच्चरन्ती। प्रकटैरन्तर्मुखीभावेनाभिन्नस्फुटप्रकाशैकमध्यमासैः करणैः सर्वेन्द्रियैः। कीदृशान्वर्णान्। प्राणसङ्घात्प्रसूतानुद्भूतान्। तत्र चिज्ज्योतिषि गुणीभूतसूक्ष्मप्राणसङ्घात्पश्यन्त्यां गुणीभूतचित्सूक्ष्मप्राणसङ्घान्मध्यमायां स्थूलप्राणसङ्घाद्वैखर्यां वर्णा जायन्ते। ते च त्रिषष्टिः। तद्यथा—अ-इ-उ-ऋ-वर्णाश्चत्वारो ह्रस्वदीर्घप्लुतभेदा द्वादश। लृकारस्य दीर्घो नास्तीति ह्रस्वप्लुतभेदाद्विविधः। संध्यक्षराणां ह्रस्वा न सन्तीति दीर्घप्लुतभेदादष्टविधाः। एवं स्वरा द्वाविंशतिः। कादयो मान्ताः पञ्चविंशतिः स्पर्शाः। अन्तस्थाश्चत्वारः। ऊष्माणश्चत्वारः। कुं खुं गुं घुं इति यमाश्चत्वारः। अनुस्वारविसर्गजिह्वामूलीयोपध्मानीया अं अः ×क ×प इति चत्वारः। यथोक्तम्—'स्वरा द्वाविंशतिश्चैव स्पर्शानां पञ्चविंशतिः। यादयः शादयश्चाष्टौ चत्वारश्च यमाः स्मृताः ॥ अनुस्वारो विसर्गश्च ×क ×प इति पराश्रयौ। त एते गदिता वर्णास्त्रिषष्टिरिह सूरिभिः ॥' इति। मित्रः सूर्योऽन्तरशेषद्वैतप्लोषकारित्वादग्निः। वरुणो ह्लादाप्यायकारित्वात्सोमः। 'वर्णानन्तः प्रकटकरणैः प्राणसङ्घात्प्रसूते' इति पाठान्तरे या परा वाक्शक्तिर्मित्रावरुणसदनादुच्चरन्ती प्रमाणमेयात्मकसूर्यचन्द्राश्रयेणात्माकाशादूर्ध्वं सरन्ती सर्वोत्तीर्णं निजं धाम प्रमातृरूपं श्रवन्ती अस्ति सैवान्तःप्रकटैरन्तरेव स्फुटैरिन्द्रियैः कृत्वा त्रिषष्टिं वर्णान्प्राणसङ्घाद्धेतोः प्रसूते जनयतीत्यन्वयः। इन्द्रियाणां रूपाद्युपलब्ध्यानुमेयत्वा-

१. अयं श्लोको महाभारतटीकायां योगवासिष्ठटीकायां श्रीमद्भागवतटीकायां च तत्तट्टीकाकर्तृभिः प्रमाणतया समुद्धृतोऽस्ति. २. 'अन्तः' ख. ३. 'सङ्घप्रसूतान्' ख.

द्बहिःस्फुटत्वाभावेनान्तःप्रकटीभावः । एतदभिधेयपक्षे उच्चारणप्रसूत्योः क्रमेणानुवाद्यविधेयभावः ॥

एवं वाक्प्रसरान्तं भगवन्तं स्तुत्वा मध्यमधामसाफल्यमर्थयते—

ऊर्ध्वाधःस्थान्यतनुभुवनान्यन्तरा संनिविष्टा[1][2]
नानानाडिप्रसवगहना सर्वभूतान्तरस्था ।
प्राणापानग्रसननिरतैः प्राप्यते ब्रह्मनाडी
सा नः श्वेता भवतु परमादित्यमूर्तिः प्रसन्ना ॥ ५ ॥

परमादित्यस्य चिद्भानोर्ब्रह्मनाडीरूपा या सेति दिव्या मूर्तिः समुच्छ्रिताकृतिर्नोऽस्माकं प्रसन्ना प्रशस्ता प्रशमितप्राणादिकालुष्या अत एव श्वेता चिदानन्दघनतया स्फुरन्ती अस्तु । कीदृशी सा । या ऊर्ध्वमधश्च स्थितानि अतनून्यनल्पानि अनाश्रितादिकालाग्न्यन्तभुवनेशनानाभुवनानि देहे बहिश्चान्तरा मध्ये संनिविष्टा व्याप्यावस्थिता । तथा नानानाडीनां चक्षुरादिरोमरन्ध्रान्तानां सुषिराणां प्रसवेन स्फारेण गहना सर्वैर्दुष्प्रापा । सर्वेषां स्थावरादिदेवयोनिभेदान्तानां भूतानामन्तरस्था देहमध्ये वर्तमाना । यतश्चोक्तयुक्त्या गहना अत एव कैश्चिदेव प्राणापानयोः सर्ववाहप्रसवप्रवेशयोर्ग्रसननिरतैर्भक्षणप्रगल्भैः प्राप्यते समाविश्यते ॥

किं च—

न ब्रह्माण्डव्यवहितपथा नातिशीतोष्णरूपा
नो वा नक्तंदिवगममितातापनीयापराहुः ।
वैकुण्ठीया तनुरिव रवे राजते मण्डलस्था
सा नः श्वेता भवतु परमादित्यमूर्तिः प्रसन्ना ॥ ६ ॥

ब्रह्मणो ब्रह्मबिलावरणनिविष्टस्याण्डं गर्भीकृतभूमूलमायाण्डप्रपञ्चशक्त्यण्डं तेन न व्यवहिता अपि तु समन्ततः क्रोडीकारी पन्थाः प्रसरमार्गो यस्याः तथा अतिशीतः सोमः अत्युष्णो वह्निः इयं तु द्वैतदाहादद्वैतानन्दस्यन्दित्वाच्च नैवंरूपा अपि तु समरसीभूताग्नीषोमात्मा । तथा नक्तंदिवं रात्रिंदिनं यो गमो भ्रमणं तेन नो इता प्रमेयभावं न प्राप्ता तद्वती । तथा अतापनीया परमाह्लादप्रदा । तथा अपगतो राहुराच्छादनप्रधानः शून्यप्रमाता यस्याः सा । किं च रवेश्चिद्भानोर्मण्डले रश्मिपरिवेषे राजते दीप्यते । बाह्यार्कमूर्तिस्तु ब्रह्माण्डव्यवहिता स्वर्लोकान्तमात्रावभासिका शिशिरग्रीष्मादावतिशीतोष्णरूपा अहर्निशं भ्रमन्ती संतापिका राह्वभिभूता चेति व्यतिरेकध्वनिः । वैकुण्ठस्य विष्णोर्मूर्तिरिवेत्युपमा । सापि च बलिवञ्चनावसरे ब्रह्माण्डे ब्रह्माण्डान्तर्निरुद्धमार्गा न केनचित् । अत एव नातिशीतोष्णरूपा । प्रकाशाह्लाददा भक्तानामित्यर्थः ।

१. 'ऊर्ध्वाधःस्थादतनु' ख. २. 'अन्तरं' ख.

नक्तंदिवगमेनाहोरात्रपरिभ्रमणेन न मिता । देवादिभिर्नैयत्तया परिच्छिन्नेत्यर्थः । तापनीया महाप्रतापवती । अपगतराहुरपक्रान्तरविमण्डला चेति श्लेषः । एवमयमत्रोपमाश्लेषो व्यतिरेकध्वनिना संसृष्टः ॥

अथ युगपदन्तर्बहिश्चार्कमूर्तिं स्तौति—

यत्रारूढं त्रिगुणवपुषि ब्रह्म तद्बिन्दुरूपं
योगीन्द्राणां यदपि परमं भाति निर्वाणमार्गः ।
त्रय्याधारः प्रणव इति यन्मण्डलं चण्डरश्मे-
रन्तःसूक्ष्मं बहिरपि बृहन्मुक्तयेऽहं प्रपन्नः ॥ ७ ॥

तच्चण्डरश्मेश्चिद्दीप्तांशोर्मण्डलं मुक्तये समावेशात्मजीवन्मुक्त्यर्थं प्रपन्नोऽस्मि । कीदृशम् । अन्तश्चिद्भुवि सूक्ष्ममाद्योन्मेषात्म । योगीन्द्रैरेव लभ्यम् । बहिरपि बृहन्महापरिमाणम् । यत्र सृष्टिस्थितिसंहारकारिरजःसत्त्वतमोनिविष्टब्रह्मविष्णुरुद्राभिधाय्यकारोकारमकाराख्यह्रस्वदीर्घप्लुतवर्णत्रयात्मत्रिगुणवपुषि प्रणवे विश्ववेद्याविभागवेदनात्मा बिन्दुरिति तदुपलक्षितोन्मनान्ताप्रमेयपरिपाटीरूपं यस्य तादृग्ब्रह्म बृहद्बृंहकं च शाक्तं तेज आरूढयत्युत्कृष्टतया व्यवस्थितम् । यच्च परममसामान्यम् । योगीन्द्राणां मितयोग्यतिशायिपरतत्त्वैकभाजां निर्वाणमार्गो जीवन्मुक्त्युपायो भाति स्वप्रकाशतया स्फुरति । त्रय्याः प्राङ्निर्णीताया आधार आश्रयः । प्रकर्षेण नूयते उत्कृष्टतया विमृश्यते परं पारमेश्वरं स्वरूपं येनेति कृत्वा प्रणव इत्येतन्नाम यत् । बाह्येऽप्यर्कमण्डले 'नवयोजनसाहस्रो विग्रहोऽर्कस्य मण्डलम् । त्रिगुणं' इति स्वच्छन्दादिष्टनीत्या यत्र बिन्दुरूपमिति सितवर्तुलाकारं ब्रह्ममयं तदसामान्यं बिम्बमारूढम् । तच्च योगिनां निर्वाणमार्गः । तेषां हि सूर्यमण्डलभेदनस्य श्रवणात् । तथा वक्ष्यमाणदृशा सामग्यजुर्मयधाममण्डलाकृतित्वात्त्रय्याधारः । प्रकर्षेण नूयमानत्वात्प्रणवो विश्वशरीरत्वाच्च प्रणवः ॥

यस्मिन्सोमः सुरपितृनरैरन्वहं पीयमानः
क्षीणः क्षीणः प्रविशति यतो वर्धते चापि भूयः ।
यस्मिन्वेदा मधुनि सरघाकारवद्भान्ति चाग्रे
तच्चण्डांशोरमितममृतं मण्डलस्थं प्रपद्ये[1] ॥ ८ ॥

चिद्भानोर्मण्डलस्थं मध्यधामनिविष्टं तत्परमानन्दरूपममितमनल्पममृतं प्रपद्ये समाश्रये । यत्रामृते सोमः सर्वो मेयवर्गः सुरादिभिः सर्वैः प्रमातृभिः प्रतिदिनं कलाग्रासयुक्त्या पीयमानत्वात्क्षीणः क्षीणः सन्पुनः पुनः प्रविशति हृद्विश्रान्त्यनन्तरं निमज्जति । यत एव मण्डालाद्भूयोऽपि वर्धतेऽभिव्यज्यते मेयरूपश्चन्द्रः । यस्मिंश्च वेदाः सर्वशास्त्राणि मधुनि माक्षिके सरघाणां मधुकरीणामाकार इवाग्रे भान्ति पुरः स्फुरन्ति । यथा सरघा

1. 'तत्प्रपद्ये' ख.

माक्षिकं संचित्य परिवृत्त्य सोल्लासमासते तथा सर्वे वेदा वाक्यैकवाक्यतया पराद्वयसमृतमामृश्य भ्राजन्ते। बाह्योऽपि सोमः कृष्णपक्षेषु पितृदेवनरग्रस्तकलापञ्चदशकोऽमावास्यायां सूर्यमण्डलं प्रविश्य वर्धते। वेदाश्चार्कज्योतिर्लग्ना आसते॥

ऐन्द्रीमाशां पृथुकवपुषा पूरयित्वा क्रमेण
क्रान्ताः सप्त प्रकटहरिणा येन पादेन लोकाः।
कृत्वा ध्वान्तं विगलितबलिव्यक्ति पाताललीनं
विश्वालोकः स जयति रविः सत्त्वमेवोर्ध्वरश्मिः॥ ९॥

'यो हि यस्माद्गुणोत्कृष्टः स तस्मादूर्ध्वमिष्यते' इति स्थित्या ऊर्ध्वा विश्वोत्कृष्टा रश्मयो यस्य। अत एव सतां विद्यमानानामशेषाणां भावः सत्त्वं महाप्रकाशात्मरूपम्। तदेव तत्परमार्थः। ततश्च प्रकाशमानतया प्रकाशात्मन्येव विश्वस्य मग्नत्वात्प्रकाशो विश्वालोकः स एव रविश्चिद्भानुर्जयति सर्वोत्कर्षेण वर्तते। येनैन्द्रीमाशां प्राच्योन्मेषदशां पृथुकवपुषा योगिगम्यसूक्ष्मशाक्तस्पन्दात्मना पूरयित्वा उन्मिषितप्राणादिसंकोचचित्प्राधान्योच्छलितां कृत्वा 'शिवादिसकलात्मान्ताः शक्तिमन्तः प्रकीर्तिताः' इति श्रीपूर्वादिष्टनीत्या शिवमन्त्रमहेश्वरमन्त्रेश्वरमन्त्रविज्ञानाकलप्रलयाकलसकलाख्याः क्रमात्क्रमं प्राणीयतुटिस्था निजशक्तिसहिताः सप्तलोकाः 'पादोऽस्य विश्वा भूतानि' इति स्थित्या पादेन निजांशमात्रेणाक्रान्ताः क्रोडीकृत्य स्वज्योतिर्मयीकृताः। कीदृशेन। प्रकटाः स्वात्माभासा रूपादिविश्वहरणाद्धरयश्चक्षुरादिशक्तयो यस्य। तदुक्तं श्रुतौ—'युक्ता ह्यस्य हरयः शता दश' इति। निःसंख्यशक्तिरात्मेति ह्यस्यार्थः। कथं क्रान्ताः। ध्वान्तमात्मन्यनात्मप्रतीत्यात्माज्ञानं विगलिता वलिरनात्मन्यात्माभिधायिनी व्यक्तिर्यस्य तादृक् पाताललीनं निःशेषप्रशमितं कृत्वा। बाह्येनाप्यर्केण सप्ताश्वारूढेनैन्द्रीं दिशं सूक्ष्मरूपेणापूर्य भूरादिलोकाः पादेन मरीचिभिर्ध्वान्तं ध्वंसयित्वा क्रमेण क्रान्ताः। प्रकटहरिणा च नारायणेन विगलिता बल्याख्यस्य दानवेन्द्रस्य व्यक्तिर्यत्र तद्ध्वान्तं दानवकुलं पाताललीनं कृत्वा भूरादिलोकाश्चरणविन्यासक्रमेणाक्रान्ताः। किं कृत्वा। पृथुकवपुषा बालवामनशरीरेण इन्द्रादिदिगापूरणं कृत्वा। सोऽपि विश्वालोकः सत्त्वप्रधानश्चेत्यत्र श्लेषालंकारः। श्लेषोपमाध्वनिसंसृष्टिरियम्॥

ध्यात्वा ब्रह्म प्रथममतनु प्राणमूले नदन्तं
दृष्ट्वा चान्तः प्रणवमुखरं व्याहृतीः सम्यगुक्त्वा।
यत्तद्वेदे तदिति सवितुर्ब्रह्मणोक्तं वरेण्यं
तद्भर्गाख्यं किमपि परमं धामगर्भं प्रपद्ये॥ १०॥

ब्रह्मणा प्रजापतिना वेदेषु प्रणवमुखरमोंकारोच्चारणपूर्वं तदित्यादि गायत्र्याः सवितु-

१. 'मूलेन दत्त' ख.

विश्वप्रसूतिहेतोश्चिदादित्यस्य यत्तत्किमपीत्यसामान्यं भर्ग इत्याख्या यस्य तत्परमं सर्वोत्कृष्टं धाम परस्फुरत्तात्म शाक्तं तेजो बाह्यसूर्यसोमवह्न्यादिधामक्रोडीकारित्वाद्धामगर्भं वरेण्यमनुग्रहकारि उक्तं तत्प्रपद्ये समाविशामि । किं कृत्वा ब्रह्मणोक्तम्, किं कृत्वा च प्रपद्ये । प्रथममादावतनु अशरीरं श्रीभर्गशिखादिष्टनीत्या अकारपरामर्शात्म वीरेश्वराख्यं च ब्रह्म बृहद्बृंहकं च परं शाक्तं धाम प्राणमूले अप्राणाद्यस्फुरत्ताधाम्नि ध्यात्वा विचिन्त्यानन्तरं नदन्तमिति नादाख्यं परविमर्शात्मानमन्तरित्युक्तशाक्तरूपप्राणितकल्पतया स्थितं दृष्ट्वा स्वात्मतया साक्षात्कृत्य तन्नादविमर्शानुप्रवेशावष्टम्भबलोन्मिषत्प्रणवोच्चारणपूर्वम् । तथा 'भूः स्वाहा' 'भुवः स्वाहा:' 'स्वः स्वाहा' 'भूर्भुवःस्वःस्वाहा' इति च मन्त्ररूपा समग्रमेयमानप्रमातॄणां ससंस्काराणां परब्रह्ममयत्वामर्शिनीर्व्याहृतीश्चतस्रः सम्यगित्यन्तरामर्शावष्टम्भाशैथिल्येनोक्त्वा उच्चार्य । अथ च 'सर्वव्यवहारानेकरूपाः कथा जपः' इति शिवसूत्रादिष्टनीत्या तदभेदामर्शप्रधानतया परशाक्तरसप्लावितान्संपाद्य । शाक्तधामैकाग्र्यवशासादितशांभवधामावष्टम्भबलेन व्युत्थानदशामपि तदभेदरसप्रोक्षितां विधायेत्यर्थः । धामगर्भमित्यत्र धामशब्दस्तन्त्रेण द्विरुक्तः । तथा प्रणवमुखरमिति ॥

त्वां स्तोष्यामि स्तुतिभिरिति मे यस्तु भेदग्रहोऽयं
सैवाविद्या तदपि सुतरां तद्विनाशाय[1] युक्तः ।
स्तौम्येवाहं त्रिविधमुदितं स्थूलसूक्ष्मं परं वा
विद्योपायः[2] पर इति बुधैर्गीयते खल्वविद्या ॥ ११ ॥

हे भगवन्, त्वां स्तुतिभिः स्तोष्यामीति स्तोतृस्तुत्यस्तुतिकल्पनात्मा यो मे भेदग्रह एषैव चिदद्वयाप्रथनात्माविद्या तथापि तस्या अविद्यायाः सुतरामतिशयेन विनाशाय निःशेषोन्मूलनाय युक्तो नित्यसंबद्धस्त्वां स्तौम्येव देहाप्रमातृतानिमज्जनेन सर्वोत्कृष्टतया सततं परामृशामि न तु क्षणमप्युदासीन आसे । त्वामेव चिदर्कं स्तौमि न तु परिमितां कांचन देवताम् । कीदृशं त्वाम् । स्थूलं बाह्यप्राणार्करूपम् । सूक्ष्मं मध्यनाडीगतं प्राणब्रह्मरूपम् । परं चानवच्छिन्नं विश्वात्मचिदानन्दघनम् । तदिति प्राक्तनवाक्यव्यावर्णितमेकमेव । नित्योदितं च । वाशब्दश्चार्थे । युक्तं चैतत् । यतो बुधैस्तत्त्वज्ञैरविद्यैव विद्योपायः पर इत्युक्तः । स्तोतृस्तुत्यादिविभागकल्पनात्माविद्यया समस्ताविद्यावीजदेहादिप्रमातृत्वाभिमानप्रशमनेन चिदानन्दघनपरमात्मोत्कर्षपरामर्शात्मा स्तुतिः परमसमावेशप्रदेत्यर्थः ॥

स्तौम्येवेत्युक्तिं प्रपञ्चयति—

योऽनाद्यन्तोऽप्यतनुरगुणोऽणोरणीयान्महीया-
न्विश्वाकारः सगुण इति वा कल्पनाकल्पिताङ्गः ।

---

१. 'तद्व्युदासाय' ख. २. 'वेद्योपायः' ख.

नानाभूतप्रकृतिविकृतीर्दर्शयन्भाति यो वा
तस्मै तस्मै भवतु परमादित्य नित्यं नमस्ते ॥ १२ ॥

हे परमादित्य चिदर्क, तस्मै तस्मै इति परसूक्ष्मस्थूलरूपाय विश्वात्मने तुभ्यं नित्यं नमः । सर्वकालं देहादिप्रह्वतया परामृशंस्त्वामेव समाविशामीत्यर्थः । कीदृशाय तस्मै योऽनाद्यन्तो देशकालाद्यनवच्छिन्नः । अतनुराकारानियन्त्रितः । अतश्च सार्वज्ञादिगुणास्पृष्टः । अणोरत्यन्तसूक्ष्मरूपतया योगिदृश्यात्परमाणोरप्यणीयानतिसूक्ष्मः न कस्यापि वेद्यः । अपि तु स्वप्रकाशचिदेकरूपः । न तु देशतः संकुचितः । परमाणोः सूक्ष्मस्य वेद्यत्वादृश्यत्वाच्च । महीयान्व्यापकः । अतश्च विश्वक्रोडीकारित्वाद्विश्वाकारः । सार्वज्ञादिगुणयोगात्सगुणः । इत्येवंप्रकारया कल्पनया कल्पितानि पृथक्पृथगुल्लिखितान्यङ्गानि तत्तद्धर्मरूपा अवयवभागा यस्य तादृग्वेत्यनयोक्त्यावच्छिन्नवस्तुविषयशब्दविकल्पासंस्पृष्टं परमेकं स्वरूपमनवच्छिन्नमिति ध्वनयति । नानाभूतानि विचित्राः स्थावरादिब्रह्माण्डान्ताः प्राणिनस्तेषां प्रकृतीर्मायाप्रकृतिशुक्रशोणितादिकारणानि, विकृतीः कलाबुद्धिदेहादिकान्दर्शयन्य आभाति । संकुचितसर्वाभासोल्लासकतया वा यः स्फुरतीत्यर्थः ॥

तत्त्वाख्याने त्वयि मुनिजना नेति नेति ब्रुवन्तः
श्रान्ताः सम्यक्त्वमिति न च तैरीदृशो वेति चोक्तः ।
तस्मात्तुभ्यं नम इति वचोमात्रमेवास्मि वच्मि
प्रायो यस्मात्प्रसरतितरां भारती ज्ञानगर्भा ॥ १३ ॥

यस्मात्त्वत्तो भारती पश्यन्त्यादिवाक् ज्ञानगर्भा स्वावभाससंवित्प्रधाना प्रसरति तस्मै तुभ्यं नम इति वचोमात्रमेव, न त्वतिरिक्तं स्तुतिवाक्यादि वच्मि । ज्ञानस्य सर्ववाक्प्रसरहेतोः अनवच्छिन्नस्य विभिन्नस्तुतिवाग्भिः स्तोतुमशक्यत्वात् । नमःशब्देन तु देहादिप्रह्वतां तुरीयकस्वचित्प्रकर्षपरामर्शनस्य कर्तुं शक्यत्वात् । युक्तं चैतत् । यस्मान्मुनयोऽपि त्वयि त्वद्विषये तत्त्वाख्याने अणुर्न महान् न ह्रस्वं दीर्घं नेत्यादि ब्रुवन्तः श्रान्ताः क्लिष्टाः । न च तैस्त्वमित्येवंविधोऽसीति एतादृशो वेति एतत्तुल्यो वेति सम्यगुक्तः । वागगोचरत्वादेवेत्यर्थः ॥

सर्वाङ्गीणः सकलवपुषामन्तरे योऽन्तरात्मा
तिष्ठन्काष्ठे दहन इव नो दृश्यसे युक्तिशून्यैः ।
यैश्च प्राणारणिषु नियतैर्मथ्यमानासु सद्भि-
र्दृश्यं ज्योतिर्भवसि परमादित्य तस्मै नमस्ते ॥ १४ ॥

---

१. 'विकृतिः' ख. २. 'तुभ्यं' ख. ३. 'अभिवच्मि' ख. ४. 'यच्च' ख. ५. 'तुभ्यं' ख.

हे परमादित्य चिदर्क, तस्मै निर्विशेषाय ते तुभ्यं नमः । यस्त्वं स्थावरादिदेवयोन्यन्तानां रुद्रक्षेत्रज्ञानां च सर्वेषां सर्वाङ्गेषु भवो व्यापकः सकलवपुषामन्तरे मितग्राहकात्मनि स्वरूपे योऽन्तरात्मा परमानन्दत्वात् 'आत्मा चैवान्तरात्मा च' इति श्रीस्वच्छन्दादिदृष्टपुर्यष्टकप्रमाता तिष्ठन्नवस्थासुरपि युक्त्या योगेन शून्यैरपि न दृश्यसे । यथा काष्ठेऽग्निस्तिष्ठन्नपि युक्तिशून्यैररणिमथनानभिज्ञैर्न दृश्यते तत्काष्ठकवलीकारिज्वलद्रूपतया नोपलभ्यते । यश्च त्वं प्राणारणिषु सर्ववाहमार्गोदयविश्रान्तिपदेषु सद्भिर्योगिभिर्नियतैरभियुक्तैर्मथ्यमानासु 'ऊर्ध्वशक्तिनिपाताच्च अधःशक्तिनिकुञ्चनात् । रुद्रशक्तिसमावेशं यो जानाति स पण्डितः ॥' इत्याम्नायादिदृष्टयुक्त्यानवरतान्दोलनतः प्रशमितमरुद्व्यापिकासु दृश्यं ज्योतिर्भवसि स्वप्रकाशचिद्रूपः स्फुरसि । अत्र पर्यायेण प्राणापानावूर्ध्वाधरारणिरूपौ । योगिप्रयत्नो मथनकाष्ठम् ॥

स्तोता स्तुत्यः स्तुतिरिति भवान्कर्तृकर्मक्रियात्मा
क्रीडत्येकस्तव नुतिविधावस्वतन्त्रस्ततोऽहम् ।
यद्वा वच्मि प्रणयसुभगं गोपते तच्च तथ्यं
त्वत्तो ह्यन्यत्किमिव जगतां विद्यते तन्मृषा स्यात् ॥ १५ ॥

हे गोपते चिन्मरीचिचक्रेश्वर, भवानेकोऽद्वितीयः स्तोत्रादिरूपतया क्रीडति स्वस्वातन्त्र्यात्तत्तद्रूपतया स्फुरति । यदुक्तं मयैव भैरवानुकरणस्तोत्रे—'स्तोता स्तुत्यः स्तुतिरिति यदपि विभिन्नं न किंचिदस्तीह । मृशसि यथा यद्रूपं चिद्रूपतया भवस्येतत् ॥' इति । यतोऽहमिति भवत्कल्पितमेव । ततोऽहमिति संकोचप्रधानो मायाप्रमाता त्वत्स्तोत्रकरणेऽस्वतन्त्रस्त्वामेव चिदात्मानं स्तौमि । न त्वहं नामान्यः कश्चिदित्यर्थः । यच्च किंचित्त्वदात्मैवाहं प्रणयसुभगं प्रार्थनासुन्दरं वच्मि तत्सर्वं तथ्यं त्वत्परमार्थमेव । यतस्त्वत्तश्चिदात्मनो व्यतिरिक्तं जगतां किमिव विद्यते । न किंचिदस्ति । यदि वा तथापि किंचित्संकल्प्यते तन्मृषा स्यात् । नैव भवेत् । चिदात्मतां विना कस्यचिदपि चेतनाचेतितस्य संकल्पविकल्पविषयत्वस्याप्ययोगेन गगनकुसुमतोऽपि निकृष्टत्वात् । इत्थं युक्तितस्त्वदभेदसारैव स्तुतिः ॥

प्रातीतिकक्रमेण तु यद्यपि भेदस्तथापीत्थं त्वमाराध्योऽस्माकमित्याह—

ज्ञानं नान्तःकरणरहितं विद्यतेऽस्मद्विधानां
त्वं चात्यन्तं सकलकरणागोचरत्वादचिन्त्यः ।
ध्यानातीतस्त्वमिति न विना भक्तियोगेन लभ्य-
स्तस्माद्भक्तिं शरणममृतप्राप्तयेऽहं प्रपन्नः ॥ १६ ॥

ऐन्द्रियकज्ञानवतां मायाप्रमातॄणामस्माकमिन्द्रियागोचरो भवानचिन्त्यत्वाद्ध्यानविषयो न भवतीति देहादिमितप्रमातृतामज्जनोन्मज्जनचिदर्कभजनात्मकभक्तियोगसंपाद-

नीयत्वाद्भगवतो भक्तिमेव शाक्तस्फारावेशमयामृतप्राप्तयेऽस्म्याश्रितः । उक्तं च विज्ञानभैरवे—'भक्त्युद्रेकाद्विरक्तस्य यादृशी जायते दशा । सा शक्तिः शांकरी नित्यं भावयेत्तां ततः शिवः ॥' इति ॥

हार्दं हन्ति प्रथममुदिता या तमः संश्रितानां
सत्त्वोद्रेकात्तदनु च रजः कर्मयोगक्रमेण ।
स्वभ्यस्ता च प्रथयतितरां सत्त्वमेव प्रपन्ना
निर्वाणाय व्रजति शमिनां तेऽर्क भक्तिस्त्रयीव ॥ १७ ॥

हे अर्क, तव भक्तिः प्रपन्ना समाश्रिता सती शमिनां शान्तरागादिकलङ्कानां निर्वाणाय मोक्षाय व्रजति जीवच्छिवत्वाभिव्यक्तये घटते । त्रयी यथा । सापि हि काम्यकर्म परिहृत्यानुष्ठीयमाना त्र्यन्तविदामपवर्गहेतुः । तथा चैषा प्रथममुदिता समुन्मिषितमात्रा हार्दं प्रकाशानन्दात्महृद्द्रवं तमस्त्वभेदाख्यातिरूपमाणवं मलं संश्रितानां भक्तिभाजां हन्ति नाशयति । तदनु सत्त्वस्य प्रकाशस्योद्रेकात्प्रकर्षात्कर्मयोगक्रमेण स्वात्मदेवताविश्रान्तिफलशारीरकर्मानुष्ठानेन कार्ममलरूपं रजो हन्ति । तथा सुष्ठु अभ्यस्ता परिशीलनेन स्वीकृता सतो भावः सत्त्वं प्रकाशैकघनत्वमेव प्रकाशमाने सर्वत्र प्रथयतितराम् । न तु पशुवन्मायीयमलात्मभिन्नवेद्यप्रथाकृत् । त्र्यपि त्र्यन्तविदां तन्निष्ठानां सत्त्वं प्रथयति ॥

तामासाद्य श्रियमिव गृहे कामधेनुं प्रवासे
ध्वान्ते भातिं धृतिमिव वने योजने ब्रह्मनाडिम् ।
नावं चास्मिन्विषमविषयग्राहसंसारसिन्धौ
गच्छेयं ते परमममृतं यत्र शीतं न चोष्णम् ॥ १८ ॥

तां भक्तिमाश्रित्य चिदर्कस्य ते संबन्धि परमममृतं परं शाक्तं धाम गच्छेयं समाविशेयम् । यच्छैशिरग्रैष्मबाह्यार्कधामवैलक्षण्याच्छीतमुष्णं च न भवति । अपि तु मोहदाहप्रकाशाह्लादकृदग्नीषोमात्म । कीदृशीं ताम् । गृहे शून्ये वेश्मनि श्रियमिव । संपूर्णभोगप्रदत्वात् । प्रवासे रिक्तबन्धुदेशे कामधेनुमिव चिन्तितमात्राभीष्टफलप्रदत्वात् । ध्वान्ते गाढतमसि भातिमिव । पूर्णप्रथाहेतुत्वात् । वने गहनपर्वतादौ धृतिमिव विश्रान्तिहेतुत्वात् । योजने परशिवात्मैक्यावेशे ब्रह्मनाडिं सुषुम्णाम् । परमोपायत्वात् । विषमविषया एव ग्राहा भीषणा जलचरा यत्र तादृशे संसारसमुद्रे नावमिव । उत्तारकत्वात् ॥

अग्नीषोमावखिलजगतः कारणं तौ मयूखैः
सर्गादाने सृजसि भगवन्ह्रासवृद्धिक्रमेण ।

१. 'सत्त्वोद्रिक्ता' ख. २. 'सा स्वभ्यस्ता' ख.

तावेवान्तर्विषुवति समौ जुह्वतामात्मवह्नौ
द्वावप्यस्तं नयसि युगपन्मुक्तये भक्तिभाजाम् ॥ १९ ॥

हे भगवन्, अखिलस्य बाह्यस्य नीलसुखादेर्ग्राह्यरूपस्यान्तरस्य च ग्राहकरूपस्य देहादेर्जगतो यावग्नीषोमौ सर्ववाहवाही प्राणोऽपानश्च प्रकाशनावस्थानहेतुत्वात्कारणम्। तौ प्रसिसृक्षाप्रविविक्षात्मसर्गादानसमये वस्त्वाभासनविमर्शात्मसृष्ट्यादौ तन्निमित्तं च ह्रासवृद्धिक्रमेण द्वादशषोडशकलाकलनपर्यायतो मयूखैः सृष्ट्यादि देव्यात्मनिजमरीचिभिः सृजसि मुहुर्मुहुर्निर्मिमीषे। तावेव च भक्तिभाजामन्तर्विषुवति सम्यङ्नयनात्मसमानमरुत्प्रधाने कुम्भके समौ सोमसूर्यकलान्योन्यसंघर्षमिश्रितौ सन्तावात्मवह्नावुदानवह्नौ जुह्वतां मुक्तये शिवात्मभेदप्रथारूपाणवादिमलत्रयप्लुष्टोपलक्षितशिवाद्वैतप्राप्तये द्वावपि युगपत्क्रमं मयूखैरेवास्तं नयसि विश्वात्मक व्यानव्याप्तिमाविश्य ज्ञानक्रियात्मपग्नीषोमरूपस्वात्ममयौ संपादयसि ॥

स्थूलत्वं ते प्रकृतिगहनं नैव लक्ष्यं ह्यनन्तं
सूक्ष्मत्वं वा तदपि सदसद्व्यक्त्यभावादचिन्त्यम्।
ध्यायामीत्थं कथमविदितं त्वामनाद्यन्तमन्त-
स्तस्मादर्क प्रणयिनि मयि स्वात्मनैव प्रसीद ॥ २० ॥

हे अर्क, ते तव स्थूलत्वं विश्वव्यापकत्वं प्रकृत्या गहनत्वान्नैव लक्षयितुं शक्यम्। यस्मादनन्तं दिक्कालाकारैरनवच्छिन्नम्। सूक्ष्मत्वमपि वा 'अणोरणीयान्' इत्येतद्व्याख्यानावसरव्याकृतयुक्त्या परप्रमात्रात्म यत्तदपि सदसद्व्यक्त्यभावाद्भावाभावरूपत्वेनाप्रतीतेरचिन्त्यम्। तदित्थमनाद्यन्तत्वादविदितं त्वां कथमन्तः स्वान्ते चिन्तयामि न कथंचित्। तस्मान्मयि प्रणयिनि त्वत्प्रार्थनावहिते स्वयमेव प्रसीद प्रशमितदेहादिप्रमातृताभिमानकालुष्यः प्रस्फुर ॥

यत्तद्वेद्यं किमपि परमं शब्दतत्त्वं त्वमन्त-
स्तत्सद्व्यक्तिं जिगमिषु शनैर्लाति मात्राकलाः खे।
अव्यक्तेन प्रणववपुषा बिन्दुनादोदितं सँ-
च्छब्दब्रह्मोच्चरति करणव्यञ्जितं वाचकं ते ॥ २१ ॥

यत्किमप्यसामान्यं त्वं तदन्तरित्यन्तर्मुखानवच्छिन्नप्रकाशात्मनि पदे। शब्दतत्त्वमिति 'शास्त्रं शब्दात्मकं सर्वं शब्दो हंसः प्रकीर्तितः' इति श्रीस्वच्छन्दादिष्टानाहतभट्टारकरूपम्। परममिति परमोत्कृष्टम्। यदुक्तं श्रीकालोत्तरे—'नादाख्यं यत्परं बीजम्' इति। वेद्यमिति सुप्रकटसुस्फुरत्तात्मकत्वादनपह्नवनीयम्। न तु विदिक्रियाकर्मात्मकम्।

१. 'समं' ख. २. 'मुक्तिभाजाम्' ख. ३. 'व्यक्तिभवात्' ख. ४. 'मात्रां' ख. ५. 'यत्' ख.

यदुक्तं श्रीस्वच्छन्दे—'यस्य रूपं शरीरं वा नास्ति वर्णः क्रिया तथा । स कथं गृह्यते सूक्ष्मो ह्यग्राह्यो नित्यमव्ययः ॥' इति । श्रीभर्गशिखायामपि—'नैष वर्णो न वा शब्दो न चैवायं कलात्मकः । केवलः परमानन्दो वीरो नित्योदितो रविः ॥ नास्तमेति न चोदेति न शान्तो न विकारवान् । सर्वभूतान्तरचरो भानुर्भर्ग इति स्मृतः ॥' इति । तदेतत्परब्रह्मात्मशक्तिमद्रूपम् । सद्यक्तिं जिगमिष्विति । 'ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति स्थित्या शक्त्यात्मब्रह्मरूपतां जिघृक्षु खे सुषुम्णाधाम्नि अकारोकारमकारादिमात्रारूपाः कला विमर्शशक्तीः शनैः शनैः क्रमेण लाति गृह्णाति । इत्थं शक्तिमच्चिदर्कावभासितशब्दब्रह्मभित्तौ प्रणववपुषा ॐकारात्मना अव्यक्तेन पश्यन्ती वाक्प्रधानेन रूपेण । न तु व्यक्तेन मध्यमादिवाग्भूमिकास्पृशा । 'प्रणवः सर्ववेदेषु' इति स्थित्या क्रोडीकृताशेषवाच्यवाचकस्फारं शब्दब्रह्मोच्चरति स्वयं प्रवर्तते । न तूच्चार्यते । कीदृक् । विन्दुनादाभ्यां समस्तवेद्याभेदिवेदनसमस्तवाचकाभेदिपरामर्शरूपाभ्यामुदितम् । सर्वोत्कृष्टगगनारूढं सत्कथं समुच्चरति । अत्रागमिकीं युक्तिं स्मारयति—करणेन दिव्यकरणवन्धेन न तु जिह्वामूलमध्यादिना व्यञ्जितं प्रकटीकृतम् । यदुक्तं श्रीस्वच्छन्दे—'दिव्यं तु करणं कृत्वा तत्त्वस्योच्चारणं कुरु' इत्यादि । यच्चैतच्छब्दब्रह्मतत्त्वशक्तिस्वरूपामर्शनमुखेनैव ते वाचकं तत्स्वरूपामर्शकम् ॥

प्रातःसंध्यारुणकिरणभागृङ्मयं राजसं य-[१]
न्मध्ये चापि ज्वलदिव यजुः शुक्लभाः सात्त्विकं वा ।
सायं सामास्तमितकिरणं यत्तमोल्लासिरूपं
साह्नः सर्गस्थितिलयविधावाकृतिस्ते त्रयीव ॥ २२ ॥

हे भगवंश्चिदर्क, अह्नः सार्वजनीनस्य प्राणदिनस्य सर्गस्थितिलयविधौ ते संबन्धिनी साकृतिः क्रोडीकृताशेषसृष्ट्यादिस्तुर्याख्या शक्तिर्विजृम्भत इत्यर्थः । का सा इत्याह—प्रातः हृदुन्मेषात्मनि प्रभाते गुणीभूतप्राणापानवृत्तिः शिवशक्तिसंघट्टात्मा या संध्या तत्र येऽरुणकिरणा अनुन्मिषितवैचित्र्यादीप्ताः शरीरादयश्चक्षुरादिप्रकाशास्तान्भजते यदत एव राजसं विश्वराजानं विश्वप्रसरासूत्रणं च ऋङ्मयम् । यच्च परधामामर्शनात्मा स्तुतिकृच्च मध्ये मध्यधाम्नि यजुश्चिद्देवतापूजात्मक्रियाशक्तिप्रधानम् । द्वैतेन्धनप्लोषादिव ज्वलत् । ह्लादात्मसोमव्याप्त्युन्मज्जनाच्छुक्लभाः अमलमात्मभाः स्वरूपम् । सात्त्विकं च सतां भावः सत्त्वं प्रकाशमानत्वं तस्येदं संपादकम् । स्वप्रकाशावेशेन विश्वप्रकाशकमित्यर्थः । सायमूर्ध्वत्र्युध्र्धेऽस्तमितकिरणं गलितप्राणादिसंस्कारक्षयात्प्रशान्तसितोज्ज्वलितमरीचिनिचयम् । अतश्च निःसंस्कारद्वैताद्वैतकवलनात्तदपेक्षयैव तमोवस्तुविश्रान्त्यैकरसत्वात्साम । एतत्त्रिविधं स्थूलसूक्ष्मपरस्वरूपं यल्लासि गृह्णासि सा तवाकृतिस्त्रयीव ऋग्यजुःसामानीव । तथाहि—प्रातरर्कदेवतास्तुतिप्रधाना ऋग्वेदव्याप्तिः । मध्ये कर्मानुष्ठानात्मा यजुर्वेदोदयः । सायं विश्रान्तिहेतुगीतप्रधाना सामवेदप्रधानतेति प्रतिदिनं स्थितिः ॥

१. 'वा' ख.

ये पातालोदधिमुनिनगद्वीपलोकाधिबीज-
च्छन्दोभूतस्वरमुखनदत्सप्तसप्तिं प्रपन्नाः ।
ये चैकाश्वं निरवयववाग्भावमात्राधिरूढं
ते त्वामेव स्वरगुणकलावर्जितं यान्त्यनश्वम् ॥ २३ ॥

अतलादीनि सप्त पातालानि । क्षीराद्याः सप्तोदधयः । अत्र्याद्याः सप्त मुनयः । महेन्द्राद्याः सप्त पर्वताः । जम्ब्वादीनि सप्त द्वीपानि । भूराद्याः सप्तलोकाः । 'मोहो मदश्च गर्वश्च विषादः क्रोध एव च । भयं च हर्षणं चैव देहे सप्ताधयः स्मृताः ॥' इत्युक्ता मोहाद्याः सप्ताधयः । यवादीनि सप्त बीजानि । गायत्र्यादीनि सप्त च्छन्दांसि । भूताः प्राप्ताः । एतदामाशत्वात् । ईदृग्विश्वप्रपञ्चरूपा ये षड्जाद्याः सप्त स्वरास्ते मुखेषु येषां ते तन्मुखास्तानेवार्थान्नदन्तो ध्वनन्तः सप्त सप्तयो मनोबुद्धीन्द्रियात्मानोऽश्वा यस्य तादृशं त्वां प्रपन्नाः । ये च निरवयवा वाक् पश्यन्ती तस्या भावः सत्ता तन्मात्राधिरूढं मध्यधामोन्मिषत्पश्यन्त्यामर्शपरिमर्शितम् । अतश्चैकाश्वं च त्वां बुद्ध्वा ये प्रपन्ना उभयेऽपि ते त्वामेवानश्वं चिदर्कं परं ब्रह्म यान्ति त्वदेकतामाप्नुवन्ति । कीदृशम् । स्वरैः षड्जादिभिः गुणैः सत्त्वादिभिः कलाभिरकारादिभिर्वर्जितं निरुपाधिप्रकाशानन्दघनम् । साश्वोपासनानश्वप्राप्तिहेतुरिति विरोधाभासः ॥

दिव्यं ज्योतिः सलिलपवनैः पूरयित्वा त्रिलोकी-
मेकीभूतं पुनरपि च तत्सारमादाय गोभिः ।
अन्तर्लीनो विशसि वसुधां तद्गतः सूयसेऽन्नं
तच्च प्राणांस्त्वमिति[1] जगतां प्राणभृत्सूर्य आत्मा ॥ २४ ॥

हे भगवन्, त्वं ज्योतिःसलिलपवनैश्चित्प्रकाशकरन्ध्रप्रविशच्छाक्तामृतप्राणमरुद्भिस्त्रिलोकीं जागरस्वप्नसुषुप्तित्रयीं पूरयित्वा तस्यामेव त्रिलोक्यामेकीभूतं सामरस्यं प्राप्तं दिव्यं सारं तुर्यानन्दघनं गोभिरनुत्तरैर्मरीचिभिः पुनरिति पुनः पुनरादाय चमत्कृत्य अन्तरिति अन्तर्मुखे पदे लीनो वसुधां परां भूतिं विशसि तन्मयतया स्फुरसि तद्गतश्चान्नमदनविषयं वेद्यजातं सूयसे आद्यानीभूय तद्रूपतया स्फुरसि । तच्चान्नं प्राणापानावस्थितिहेतुस्त्वमेव न त्वन्यत्किंचिदिति । अनया युक्त्या सूर्यः प्राणभृदात्मा च कथ्यसे । यदाह श्रुतिः—'अहमन्नमहमन्नमहमन्नादोऽहमन्नाद' इति । बाह्योऽपि सूर्यो भूर्भुवःस्वस्त्रयीं ज्योतिःसलिलपवनैस्तत्र तत्र समय आपूर्य समरसीभूतं दिव्यं त्रिलोक्यां रसरूपं सारं रश्मिभिर्ग्रीष्मादावादाय पुनरपि भूमिमन्तस्तापनयुक्त्या लीनः सन्विशति । तद्गतश्चान्नमोषध्याख्यं प्राणावस्थितिहेतुं जनयति । ततः स प्राणभृदात्माऽन्नादश्च ॥

१. 'असि' ख.

अग्नीषोमौ प्रकृतिपुरुषौ बिन्दुनादौ च नित्यौ
प्राणापानावपि दिननिशे ये च सत्यानृते द्वे[1] ।
धर्माधर्मौ सदसदुभयं योऽन्तराविश्य[2] योगी
वर्तेतात्मन्युपरतमतिर्निर्गुणं[3] त्वां विशेत्सः ॥ २५ ॥

यो योगी नित्यौ सततवाहिनौ प्राणापानावेव कवलनाप्यायनहेतुत्वादग्नीषोमौ ज्ञानक्रियाशक्तिप्राधान्यात्प्रकृतिपुरुषौ वेदनविमर्शत्वाद्बिन्दुनादौ प्रसरविश्रान्तिपदत्वाद्दिननिशे विकाससंकोचनिमित्तत्वात्सत्यानृते ऊर्ध्वाधोगतिकारणत्वाद्धर्माधर्मौ बाह्यानां सत्तासत्त्वयोर्ज्ञापकत्वात्सदसदुभयमन्तरुदानधाम्नि आवेश्य विलाप्यात्मनि चिद्धाम्नि वर्तेतावतिष्ठेत स त्वां निर्गुणं सत्त्वादिगुणातीतं परमादित्यं विशत्येव ॥

गर्भाधानप्रसवविधये सुप्तयोरिन्दुभासा
सापत्न्येनाभिमुखमिव खे कान्तयोर्मध्यसंस्थः ।
द्यावापृथ्व्योर्वदनकमले गोमुखैर्बोधयित्वा
पर्यायेणापिबसि भगवन्षड्रसास्वादलोलः ॥ २६ ॥

हे भगवंश्चिद्भानो, द्यावापृथ्व्योः सर्वद्वादशान्तात्मान्तरिक्षदेहभूम्योः कान्तयोर्निजविज्ञानेनैव रमणीयतां प्रापितयोर्वदनकमले शक्तिनलिने गोमुखैरनुत्तरैर्मरीचिभिर्बोधयित्वा विकास्य असामान्यशाक्तानन्दास्वादनलम्पटः सन् पर्यायेण विचित्रोन्मेषनिमेषक्रमैरापिबसि चमत्कुरुषे । कीदृशः । मध्यसंस्थोऽग्नीषोमाधिरूढः । किमर्थम् । गर्भे स्वान्तर्यदाधानं प्रक्षेपोऽर्थाद्विश्वस्य प्रसवस्तदौचित्येन भासनं तद्विधानार्थम् । कीदृश्योर्द्यावापृथिव्योः । खे शून्यप्रमातरि सुप्तयोः 'कलोद्वलितमेतच्च चित्तत्त्वं कर्तृतामयम् । अचिद्रूपस्य शून्यादेोमत गुणतया स्थितम् ॥' इति नीत्या शून्यप्रधानताश्रयेण निमज्जितपारमार्थिकस्वरूपयोरभिमुखावस्थितयोः । कथं सुप्तयोः । सापत्न्येन परस्परप्रतियोगितयैवाभिमुखं कृत्वा । उभयानुकूलत्वादाभिमुख्यमाश्रित्येत्यर्थः । बाह्योऽप्यर्को द्यावापृथिव्यो रात्राविन्दुभासा सुप्तयोर्मीलितस्वरूपयोरभिमुखावस्थितयोर्मध्ये गोभिर्वदननलिने विकास्य तदीयविचित्ररसास्वादलोल आपिबति भौमान्तरिक्षान्रसान् । गर्भाधानाय ग्रीष्मादौ कर्षण्यादिनिजरश्म्यन्तर्निवेशनाय । प्रावृडादौ च प्रसवाय वर्षण्यादिमरीचिविसर्गतो नानौषध्युत्पत्तये । अथ च सापत्न्येनाभिमुखयोः सुप्तयोरिन्दुभासोपलक्षितयोः कर्पूराच्छुरितयोः कान्तयोर्मध्यसंस्थो नायको वैदग्ध्याद्द्वयोर्वक्त्रपद्मे पर्यायेण युगपद्बोधयित्वा लोचनपरिचुम्बनपुरःसरमुन्निद्रे विधाय वक्त्रासवामृतलम्पटो गर्भस्याधानप्रसवनिमित्तमापिबति रतयेऽत्यर्थं परिचुम्बतीति श्लेषालंकारः श्लेषध्वनिसंसृष्टश्च ॥

---

१. 'च' ख. २. 'आविश्य' ख. ३. 'निर्गुण' ख.

सोमं पूर्णामृतमिव चरुं तेजसा साधयित्वा
कृत्वा तेनानलमुखजगत्तर्पणं वैश्वदेवम् ।
आमावस्यं विघसमिव खे तत्कलाशेषमश्न-
न्ब्रह्माण्डान्तर्गृहपतिरिव स्वात्मयागं करोषि ॥ २७ ॥

हे चिदर्क । ब्रह्मरन्ध्रावस्थितशाक्तब्रह्मोपलक्षितस्याण्डस्य अन्तरिति धरामूलमायाशक्त्यण्डचतुष्टयस्य मध्ये गृहे स्वात्मयागं करोषि । किं कृत्वा । सोमं रूपादिपञ्चदशात्मकमेयं तेजसा निजमरीचिविस्फुरणेन पूर्णामृतं चरुमिव साधयित्वा 'एकैकत्र च तत्त्वेऽपि षट्त्रिंशत्तत्त्वरूपता' इतिकृत्वा विश्वात्मनिजशाक्तामृताभासमयं स्वसंनिविष्टं विधाय । अनल उदानवह्निर्मुखं प्राप्त्युपायो यस्य ब्रह्माद्यनाश्रितान्तकारणाधिष्ठितधरादिशिवतत्त्वान्ताध्वविस्फारमयस्य जगतस्तस्य तर्पणं यत्तदेव वैश्वदेवं यागं तेन सोमेन चरुणा विधाय तस्य सोमस्य कलाशेषं जगत्तर्पणोपयुक्तकलापञ्चदशावशिष्टमूर्ध्वे त्र्यर्धाख्यामावस्यासंबन्धि अमाख्यकलारूपं विघसमिव कवलिताशेषसंस्कारकल्पमिवाश्नन् । 'अमृतं चन्द्ररूपेण द्विधा षोडशधा पुनः । पिबन्ति च सुराः सर्वे दश पञ्च पराः कलाः ॥ अमाशेषगुहान्तःस्थासावस्या विश्वतर्पिणी ॥' इति श्रीकालिकाक्रमादिष्टनीत्या विश्वदेवतापरमार्थे स्वात्मनि चमत्कुर्वन् । कीदृक् त्वम् । गृहपतिरिव । सोऽपि हि पूर्णामृतकल्पमामावस्यं चरुं प्रसाध्य तेनाग्निप्रमुखसर्वजगत्तर्पणं वैश्वदेवं च कृत्वा तच्छेषमश्नन्स्वात्मदेवतायागं करोति । बाह्योऽपि सूर्यः स्वरश्मितापप्रद्रावितसोमकलापञ्चदशकेन देवर्षिनरात्मजगत्तर्पणं विधायामाख्यकलाचमत्करणात्मस्वात्मयागं ब्रह्माण्डस्यान्तर्विधत्ते ॥

कृत्वा नक्तंदिनमिव जगद्बीजमाव्यक्तिकं य-
त्तत्रैवान्तर्दिनकर तथा ब्राह्ममन्यत्ततोऽल्पम् ।
दैवं पित्र्यं क्रमपरिगतं मानुषं चाल्पमल्पं
कुर्वन्कुर्वन्कलयसि जगत्पञ्चधावर्तनाभिः ॥ २८ ॥

हे दिनकर विश्वोदयकारिदिवससंपादक चिद्भानो, जगतः सदाशिवान्तस्य विश्वस्य यद्बीजमारम्भावसानयोरुदयापवर्गकारणं श्रीस्वच्छन्दादिष्टविततपरार्धात्मकालरूपमहोरात्रं तत्कृत्वाभास्य तत्रैवान्तर्जगतः कलादिक्षित्यन्तस्याशुद्धाध्वरूपस्य बीजं मायेयमहोरात्रं तदन्तरप्याव्यक्तिकं प्राकृतं तदन्तरपि ब्राह्मं तत्रापि दैवं तत्रापि पित्र्यं प्रेत(पितृ)संबन्धि तत्रापि मानुषं क्रमेणाल्पमल्पं कुर्वन्कुर्वन्निव वैचित्र्यसहस्रैराभासयन्निव जगद्विश्वं पञ्चधावर्तनाभिर्विचित्रजागरादिदशापञ्चकपरावर्तनैः कलयसि अन्तरवस्थितं बहिः क्षिपसि । निर्मिमीषे निर्मितं च कलयसि । इदमित्थमिदमिदमिति संख्यानेन स्थापयसि । स्थापितमपि कलयसि अन्तःसंहरसि । संहृतमपि कलयसि संस्कारगालनेन विमृशसि । विमृष्टमपि कलयसि स्वात्माभेदेन जानीषे स्वप्रकाशैकात्म्यमापादयसि । तथा

१. 'आमावास्यं' ख.

पुनरपि स्वरूपात्कलयसि नवं नवमुल्लासयसि । इत्येवं सर्गस्थितिसंहृतिविलापनस्वात्मैक्याभासनपरस्परान्दोलगलीलाक्रान्तं करोषि । अत्र जगद्बीजमावर्त्य द्विर्योज्यम् । अल्पमल्पमिति वीप्सायामयमाशयः—यद्यस्य यावदहोरात्रं तत्तदीये प्राणचारे तदंशांशकास्वपि वा श्रीस्वच्छादिष्टमासोदयादिषष्ट्यब्दोदयान्तप्रक्रियया योगिज्ञानापेक्षयातिपरिमितमाभासयति भगवान्, तत्राप्यन्तर्विश्वैकात्म्यप्रथनात्सादाशिवान्तकालकलनामशेषामाभासयतीत्याभासमानोऽयं कालो न त्वस्य वास्तवं किंचित्तत्त्वमस्ति । अतएव कुर्वन्निवेतीवशब्देनायमेवार्थः स्पष्टः । वस्तुतो ह्येतावद्विश्वोदयावस्थानविलापनाद्यात्मा परमेश्वर एवेति स्फुरति । न तु चिदेकवपुषस्ततोऽतिरिक्तं किमप्यस्ति । अत्र च मानुषाद्यहोरात्रप्रमाणं श्रीस्वच्छन्दे चोक्तम् । तद्यथा—'मुहूर्तास्तु तथा त्रिंशदहोरात्रस्तु मानुषः । दक्षिणं चायनं रात्रिरुत्तरं चायनं दिनम् ॥ पितॄणां तदहोरात्रमनेनाब्दं तु पूर्ववत् । एवं देवैस्त्वहोरात्रः' इति । यत्त्विह दैवं पित्र्यं पृथगुक्तं तत्प्रेतसंबन्ध्यहोरात्रो ज्ञेयः । तेषां शुक्लकृष्णरूपो हि सः । किं च—'कल्पो ब्रह्मदिनं प्रोक्तं चतुर्युगसहस्रकम् । षट्त्रिंशत्तु सहस्राणि ब्रह्मणः प्रलयोद्भवः ॥ अव्यक्तस्थेषु रुद्रेषु दिनरात्रिश्च तावती । प्राधानिकपरार्धेन दशधा गुणितेन तु ॥ माया संहरते सर्वं पुनश्चैव सृजेज्जगत् ॥' इति । तथा—'शक्तिकालपरार्धस्य कोटिधा गुणितस्य च । अनाश्रितस्य देवस्य दिनमेतत्प्रकीर्तितम् ॥' इत्येवमादि । तथैकत्र प्राणचारे घटिकोदयात्प्रभृति षष्ट्यब्दोदयान्तं विततं तत्रादिष्टं ग्रन्थगौरवभयान्न दर्शितम् । एवमहोरात्रकृत्त्वेन जगद्विपरिवर्तकत्वं भगवत उक्तम् ॥

ये त्वहोरात्रप्रशमे रूढास्ते लोकोत्तरा एवेत्याह—

तत्त्वालोके तपन सुदिने ये परं संप्रबुद्धा
ये वा चित्तोपशमरजनीयोगनिद्रामुपेताः ।
तेऽहोरात्रोपरमपरमानन्दसंध्यासु सौरं
भित्त्वा ज्योतिः परमपरमं यान्ति निर्वाणसंज्ञम् ॥ २९ ॥

हे तपन महाप्रकाशरूप, ये योगिनस्तत्त्वालोकात्मनि शोभनेऽनिशोदितेऽनस्तमिते दिने पारमार्थिके सर्वदशानुस्यूते सर्वतोमुखे चित्प्रकाशे सम्यक्प्राणायामाद्यायासं विना विमर्शयुक्त्या प्रबुद्धा गलिताख्यातितामिस्राः । ये चान्ये चित्तोपशम एव सर्वबाह्याभ्यासनिवृत्तिहेतुत्वाद्रजनी । तस्यां योगनिद्रामुपेताः । प्रशमितविकल्पसविकल्पप्रकाशैक्यमापन्नाः । उभयेऽपि ते प्राग्वर्णितसमस्ताहोरात्रोपरम एव परमानन्दरूपाः संध्यानिमज्जत्प्राणापानव्याप्तिशिवसामरस्यभुवः सर्वतोदिक्मुदितास्तासु सौरमिति प्राणीयमपरममिति स्थूलं ज्योतिः संकुचितं प्रकाशं भित्त्वा निःसंस्कारं विलाप्य परं निर्वाणमार्गं यान्ति सदा परं शाक्तं धामाश्लिष्यन्ते ॥

न केवलां चित्रां कालकलनामकालकलितस्वरूपसमापत्तिं च दर्शयसि, यावज्जगदुदयापायावपीत्याह—

आ ब्रह्मेदं नवमिव जगज्जङ्गमस्थावरान्तं
सर्गे सर्गे विसृजसि रवे गोभिरुद्रिक्तसोमैः ।
दीप्तैः प्रत्याहरसि च लये तद्यथायोनि भूयः
सर्गान्तादौ प्रकटविभवां दर्शयन्रश्मिलीलाम् ॥ ३० ॥

आब्रह्मणः शाक्ताद्रूपादाब्रह्म निजं परं शाक्तं रूपं वर्जयित्वा इदं सर्वं सादाशिवादिक्षित्यन्तं जङ्गमस्थावरे अन्तौ भागौ यस्य तादृग्जगत्सर्गे सर्गे प्रथमेच्छोन्मेषात्मन्यादिसर्गे भूयो भूय उद्रिक्तसोमैः स्फीतशाक्तामृतैर्गोभिर्मरीचिभिर्विसृजसि आश्यानीभूतं निजरश्मिरूपं प्रकटयसि । भूयो दीप्तैरग्निप्रधानैर्गोभिस्तज्जगद्यथायोनि प्रत्याहरसि स्वस्वातन्त्र्यावभासिततत्तत्कारणनिवेशपुरःसरं लये स्वचिदैक्याभासनात्मनि संहारे प्रतीपमाहरसि चिदेकमयमेव करोषि । किं कुर्वन् । सर्गस्य सृष्टेरादौ अन्ते प्रकटविभवां स्फुटमाहात्म्यां रश्मिलीलां प्रकटयन्निजमरीचिविलासमाभासयन् ॥

श्रित्वा नित्योपचितमुचितं ब्रह्मतेजःप्रकाशं
रूपं सर्गस्थितिलयमुचा सर्वभूतेषु मध्ये ।
अन्तेवासिष्विव सुगुरुणा यः परोक्षः प्रकृत्या
प्रत्यक्षोऽसौ जगति भवता दर्शितः स्वात्मनात्मा ॥ ३१ ॥

हे भगवन्, यः प्रकृत्या स्वभावेन परोक्षोऽक्षागोचर आत्मा असौ जगति सर्वभूतेषु मध्ये भवतान्तेवासिषु अनुग्राह्येषु आत्मनैव प्रत्यक्षो दर्शितः स्वप्रकाशतया प्रकटीकृतः । किं कृत्वा । नित्योपचितं सदा परिपूर्णमुचितं चिदानन्दघनं रूपं श्रित्वा देहादिनिमज्जनेनोन्मग्नं विधाय । कीदृग्रूपम् । ब्रह्मतेजःप्रकाशं बृहत्त्वाद्बृंहकत्वाच्च ब्रह्म द्वैतदाहित्वात्तेजो यस्य तादृशः प्रकाशः प्रथा यस्य । कीदृशेन भवता । सर्गस्थितिलयमुचा जननादिशून्येन यथान्तेवासिषु शिष्येषु शोभनेन दृष्टतत्त्वेन गुरुणा आत्मा दर्श्यते चिन्मयी सत्ता प्रकटीक्रियते । तथा त्वयान्तः परमात्मतया बहिश्च तेजो विश्वरूपतया स्वयमात्मा प्रकटीक्रियते ॥

लोकाः सर्वे वपुषि नियतं ते स्थितास्त्वं च तेषा-
मेकैकस्मिन्युगपदगुणो विश्वहेतोर्गुणीव ।
इत्थंभूते भवति भगवन्न त्वदन्योऽस्मि सत्यं
किं तु ज्ञस्त्वं परमपुरुषोऽहं प्रकृत्यैव चाज्ञः ॥ ३२ ॥

हे भगवन् परानन्दात्मक स्वातन्त्र्यशक्तिस्वरूप परावागालिङ्गितमूर्ते, ते तव विश्वहेतोरशेषकारणस्य वपुषि प्रकाशानन्दघने स्वरूपे सर्वे लोका लोक्यमानाः पदार्थाः, लोकयितारश्च रुद्रक्षेत्रज्ञरूपाः प्रमातारः स्थिताः । त्वच्चिदात्मिकां सत्तां विना हि कथ-

मेते त्वत्तो विश्वहेतोरुदियुः । तेषां च लोकानां संबन्धिन्येकैकस्मिन्वपुषि त्वं युगपदक्रमेणैव स्थितः । अन्यथा ते त्वत्प्रकाशतां विना हि कथं प्रकाशेरन् । अतश्च त्वं सत्त्वादिगुणहीनोऽपि विश्वात्मताभासगुणाद्गुणीवाभासि । इत्थमुपवर्णिते विश्वात्मनि भवति सति सत्यमस्मि नान्यः । किं तु त्वमेवंभूतः परमः पुरुषो ज्ञः परिपूर्णः सार्वज्ञ्यादिधर्मः । अहमिति त्वयैव देहादिषु ग्राहितप्रमातृभावः प्रकृत्या त्वन्मायामाहात्म्यादज्ञः । अतश्च देहादिप्रमातृतानिमज्जनेनाज्ञतां प्रशमय्य नित्यं स्वात्मसमावेशेन ज्ञतां ममोन्मज्जयेत्यर्थादुक्तं भवति ॥

संकल्पेच्छाद्यखिलकरणप्राणवाण्यो वरेण्याः[1]
संपन्ना मे त्वदभिनवनाज्जन्म चेदं शरण्यम् ।
मन्ये चास्तं जिगमिषु शनैः पुण्यपापद्वयं ते-[2]
द्भक्तिश्रद्धे तव चरणयोरन्यथा नो भवेताम् ॥ ३३ ॥

इत्थमज्ञस्यापि मे त्वदभिनवनाच्चिदात्मत्वदाभिमुख्यप्रवृत्तत्वत्परामर्शात्मस्तुतिवशात् । संकल्पः स्थूलेच्छा । इच्छा संकल्पकारणभूता सूक्ष्मविकल्पपरामर्शात्मा । आदिशब्दात्प्रयत्नस्तदनन्तरमालोचनादानादिप्रवृत्तानि वाग्वर्जान्यखिलानि करणानि सत्सहवृत्तिः प्राणः, सर्वत्रात्र सूक्ष्मपरामर्शरूपतया व्यापकत्वेन स्थिता वाणी चेत्येते मम वरणे परानुग्रहे साधवो वरेण्या जाताः तथेदमिति पश्चिमजन्म शरण्यं शरणे साधु अनुग्राह्यानुग्रहैकपरं संपन्नम् । अहं हि सर्वदशासु चिदर्कपरामर्शपरः परानप्यनुगृह्णन्स्थितः । किं च मन्ये स्वानुभवेनैवैतच्चेतये यत्पुण्यपापद्वयं सुकृतासुकृतजातं सर्वं तदित्यनन्तजन्मार्जितं शनैरस्तं जिगमिषु हिमविलायं विलीयमानं स्थितम् । प्राक्संचितसर्वकर्मणां हि ध्वंसेऽपि देहारम्भककर्मणां ध्वंसोन्मुखत्वाज्जिगमिष्वित्युक्तम् । अन्यथेति । यदि नैवं स्यात्तत्कथं भवचरणयोर्भक्तिश्रद्धे भवेताम् । नैव स्याताम् । यदुक्तं नन्दिशिखायाम्—'यदा शिवेऽभिलाषो वै जायते च नृणां सदा । तदा शिवाभिमानास्ते जायन्ते परमाणवः ॥ मुक्तास्तदैव ते दीक्षां प्राप्नुवन्ति गुरोस्ततः ।' इति ॥

सत्यं भूयो जननमरणे त्वत्प्रपन्नेषु न स्त-
स्तत्राप्येकं तव नुतिफलं जन्म याचे[3] तदित्थम् ।
त्रैलोक्येशः[4] शम इव परः पुण्यकायोऽप्ययोनिः
संसाराब्धौ प्लव इव जगत्तारणाय स्थिरः स्याम् ॥ ३४ ॥

हे देव, यद्यपि त्वत्प्रपन्नेषु त्वत्समाविष्टेषु संसारहेतुसर्ववासनादाहात् भूयो जननमरणे न स्तस्तथापि त्वन्नुतिस्त्वत्स्तुतिरेव फलं यस्य तादृगिदमेकं पश्चिमजन्म याचे । यथा भवदवमर्शात्मचमत्काराधायि एतन्मागात् । तदित्थमनेनैव त्वन्नुतिरसाविष्टेन प्रका-

१. 'वरेण्यः' ख. २. 'वा' ख. ३. 'याचेऽहमित्थम्' ख. ४. 'त्रैगुण्येशः' ख.

रेणास्मिन्नेव देहे परः शम इव शाम्यत्यस्मिन्विश्वमिति व्युत्पत्त्या परः शंकरात्मस्वभाव इव जाग्रत्स्वप्नसुषुप्तात्मनि त्रैलोक्ये ईशः प्रभुः । न तु परतन्त्रः । अत एव पुण्यो दर्शनस्पर्शनादिना परानुग्राही कायो यस्य तादृक् । अयोनिरिति नित्योदितचिदानन्दैकघनः सन्, जगतो विश्वस्य तारणाय संसाराब्धिमध्ये प्लव इव पोत इव स्थिरः स्यां चिरकालं भूयासम् ॥

सौषुम्णेन त्वममृतपथेनैत्य शीतांशुभावं
पुष्णास्यग्रे सुरनरपितॄञ्शान्तभाभिः कलाभिः ।
पश्चादम्भो विशसि विविधाश्चौषधीस्तद्गतोऽपि
प्रीणास्येवं त्रिभुवनमतस्ते जगन्मित्रतार्क ॥ ३५ ॥

हे अर्क, अतो हेतोस्ते जगतो मित्रता यौगिकमित्रशब्दाभिधेयत्वम्, यतस्त्वं सौषुम्णेन मध्यमेनामृतपथेनाप्यायिना मार्गेण शीतांशुभावमपानचन्द्रत्वमेत्यागत्याग्रे प्रथमं सुरादीन्सर्वान्प्रमातॄन्पुष्णासि लब्धावस्थितीन्करोषि । केन शान्तभाभिरन्तर्मुखीभावेनोपसंहृतबाह्यप्रथाभिः कलाभिरादिविसर्गान्तस्वाभाविमर्शशक्तिभिः । पश्चादनन्तरमम्भ इति बहिः प्रसरप्रवृत्तान्सर्ववाहान्विशसि स्वामृताच्छुरितान्करोषि । विविधाश्चौषधीर्विशसि स्थावरादिसर्वबाह्याभासान्स्वप्रकाशापूरितान्विधत्से । तद्गतो मेयप्रपञ्चात्मतया स्फुरितोऽपि त्रिभुवनं विश्वमेवमिति तदाभासनविमर्शनयुक्त्यैव चन्द्रत्वमेत्य पूर्वोक्तनीत्या सुरादीन्प्रीणासि तर्पयसि । बाह्योऽप्यर्कः सुषुम्णामार्गेणामृतसंक्रमणयुक्त्या चन्द्रत्वमेत्य पूर्वोक्तनीत्या सुरादीन्पुष्णाति । शान्तभाभिर्निवृत्तदीप्तिभिः कलाभिः शक्तिभिरम्भो विशति दक्षिणायने आसाररूपतां स्वीकरोति । ओषधीश्च विशति सरसाः करोति । तद्गतश्च वैश्वदेवयागानुयागक्रमेण त्रिभुवनं पुष्णञ्जगन्मित्रत्वमेव दर्शयति ॥

मन्दाक्रान्ते तमसि भवता नाथ दोषावसाने
नान्तर्लीना मम मतिरियं गाढनिद्रां[2] जहाति ।
तस्मादस्तंगमिततमसा पद्मिनीवात्मभासा
सौरीत्येषा दिनकर परं नीयतामाशु बोधम् ॥ ३६ ॥

हे नाथ दिनकर स्वामिन् चिदर्क, त्वया तमस्यज्ञाने मन्दाक्रान्ते निर्मूलनायाघ्राते सति इयं मदीया मतिर्धी रागद्वेषाणामवसाने जातेऽपि अन्तर्लीनान्तर्मुखीभूतापि गाढनिद्रां त्वदभेदाख्यातिं न जहाति । तस्मादेषा त्वया अस्तंगमितं तमो यया तादृश्यात्मभासा स्वदीप्त्या कारणभूतया आश्वविलम्बितमेव परं बोधं प्रशान्ताख्यातिनिजज्योतिरात्मतां नीयतां प्राप्यताम् । सूर्यो देवता यस्याः सा सौरीति कृत्वा पद्मिनीव नलिनीव । सापि त्वया दोषावसाने प्रभाते तमसि मन्दाक्रान्तेऽन्तर्लीना कर्णिकासंश्लिष्टदला गाढनिद्रां न जहातीत्यस्तंगमिततमसा स्वात्मभासा गाढीभूतज्योतिषा प्रबोध्यते त्वया ॥

१. 'शाश्वतीभिः' **ख.** २. 'गूढनिद्रां' **ख.**

येन ग्रासीकृतमिव जगत्सर्वमासीत्तदस्तं
ध्वान्तं नीत्वा पुनरपि विभो तद्दयाघ्रातचित्तः ।
धत्से नक्तंदिनमपि गती शुक्लकृष्णे विभज्य
त्राता तस्माद्भव परिभवे दुष्कृते मेऽपि भानो ॥ ३७ ॥

हे विभो भानो चिन्मरीचिमालिन्, येन तमसाज्ञेन जगदिदं ग्रासीकृतमासीत्, तदनुगृहीतान्प्रत्यस्तं नीत्वा विनाश्य तद्दयाघ्रातचित्त इव तदनुकम्पयैव शुक्लकृष्णगती विभज्य व्युत्थानावसरे प्राणापानभूमिकामवरुध्य तद्ध्वान्तं पुनरपि धत्से पुष्णासि । निर्व्युत्थानं समाधिं झगिति न वितरसीत्यर्थः । यथा बाह्यो भानुर्ग्रासीकृतजगत्तिमिरं विनाश्य पुनर्दययेव नक्तंदिनं निशादिने विभज्य धत्ते पुष्णातीति श्लेषोपमा । यत एवं दुरात्मनि तमस्यपि त्वमनुकम्पावानिव ततो मे मम परिभवे व्युत्थानात्मनि क्लेशेऽपि त्राता रक्षिता भव । कीदृशे परिभवे । दुष्कृते दुष्टं कृतं करणं विषयहानादानादिपरिभवो यत्र । निर्व्युत्थानसमावेशरसास्वादिनं मां कुर्वित्यर्थः ॥

व्युत्थितः समावेशमप्राप्नुवन्व्युत्थानदशानिर्भर्त्सनपरः समावेशपरं भगवन्तं प्रार्थयितुमाह—

आसंसारोपचितसदसत्कर्मबन्धाश्रिताना-
माधिव्याधिप्रजननमरणक्षुत्पिपासार्दितानाम् ।
मिथ्याज्ञानप्रबलतमसा नाथ चान्धीकृतानां
त्वं नस्त्राता भव करुणया यत्रतत्रस्थितानाम् ॥ ३८ ॥

सत्पुण्यम् । असत्पापम् । यत्रतत्रस्थितानामिति देशे कालेऽवस्थावैचित्र्ये च त्राता समावेशप्रथनेन रक्षकः । शिष्टं स्पष्टम् ॥

सत्यासत्यस्खलितवचसां शौचलज्जोज्झिताना-
मज्ञानानामफलसफलप्रार्थनाकातराणाम् ।
सर्वावस्थास्वखिलविषयाभ्यस्तकौतूहलानां
त्वं नस्त्राता भव पितृतया भोगलोलार्भकाणाम् ॥ ३९ ॥

भोगेषु विषयसुखेषु लम्पटानामस्माकमर्भकाणां बालानामिव त्वं पितृतया जनकत्वेन त्राता भवेति प्राग्वत् । त्वं ह्यस्माकं तत्त्वदृष्ट्या जनकः । सत्यासत्येत्युभयत्र समम् । स्खलितं प्रमादि एकत्र, अन्यत्रास्पष्टवर्णत्वम् । एवं शौचं चैत्तं शारीरं च । अफला सफला च या प्रार्थना तया कातराणामधीराणाम् । यत्तत्प्रार्थयमानानामिति सुबोधमन्यत् ॥

---

१. 'दिवमिव' ख. २. 'लज्जोर्जितानां' ख.

यावद्देहं जरयति जरा नान्तकादेत्य दूती
नो वा भीमस्त्रिफणभुजगाकारदुर्वारपाशः।
गाढं कण्ठे लगति सहसा जीवितं लेलिहान-
स्तावद्भक्ताभयद सदयं श्रेयसे नः प्रसीद ॥ ४० ॥

हे भक्ताभयद, यावद्व्युत्थिता मरणावसानां दुर्दशां नाप्नुमस्तावन्नोऽस्माकं प्रसीद देहादिसंस्कारकालुष्यप्रशमनेन निर्मलीभव। निर्व्युत्थानप्रकाशानन्दघनपरमसमावेशामृतरसास्वादसुखितानस्मान्संपादयेत्यर्थः। स्पष्टमन्यत् ॥

विश्वप्राणग्रसनरसनाटोपकोपप्रगल्भं
मृत्योर्वक्त्रं दहननयनोद्दामदंष्ट्राकरालम्।
यावद्दृष्ट्वा व्रजति न भिया पञ्चतामेष काय-
स्तावन्नित्यामृतमय रवे पाहि नः कांदिशीकान् ॥ ४१ ॥

मृत्योरन्तकस्य वक्त्रं दृष्ट्वा यावदेष काय इति सपुर्यष्टको देहो भिया भीत्या पञ्चतां मृत्युं न व्रजति तावदेव रवे चिदर्क नित्यामृतमय अनस्तमितपरमानन्दैकघनस्वभाव, नोऽस्मान्कांदिशीकान्व्युत्थाने त्वत्समावेशप्राप्तिं विना कां दिशं कायतः का दिक्का दिगस्माकमिति क्रन्दतः पाहि निर्व्युत्थानसमावेशान्संपादय। कीदृङ्मृत्योर्वक्त्रम्। विश्वेषां प्राणग्रसनो जीवितभक्षको रसनाटोपो लोलरसनाव्यापारो यस्य तादृशि कोपे प्रगल्भं प्रौढम्। तथा दहनानि शोषकाणि नयनानि यस्य तादृक्। तथा उद्दामाभिरूर्जिताभिर्दंष्ट्राभिः करालम् ॥

शब्दाकारं वियदिव वपुस्ते यजुःसामधाम्नः
सप्तच्छन्दांस्यपि च तुरगा ऋङ्मयं मण्डलं च।
एवं सर्वश्रुतिमयतया मद्दयानुग्रहाद्वा
क्षिप्रं मत्तः कृपणकरुणाक्रन्दमाकर्णयेमम् ॥ ४२ ॥

हे भगवन्, ते तव निर्णीतदृशा सामवेदात्मकं धाम तेजो यस्य तादृशः। यजुर्वेदात्मकं शब्दाकारं वपुः शरीरं वियदिव व्यापकम्। तदपि शब्दाकारमिति शब्दानाकरोति समस्तशब्दाश्रयः। अपि च गायत्र्यादि सप्तच्छन्दांसि ते तुरगाः। मण्डलं प्रभापरिवेषोऽपि ऋग्वेदमय इत्येवं सर्वश्रुतिमयत्वात्, यद्वा अनुकम्पाप्रधानादनुग्रहान्मत्तो मत्सकाशादुक्तवक्ष्यमाणप्रार्थनापरत्वात्कृपणं विरसं संसारविभावकत्वाच्च करुणं करुणरसप्रधानमिममाक्रन्दं त्वत्प्रसादप्रार्थनापरं प्रलपितं क्षिप्रमुदीरणानन्तरमेवाकर्णय करुणयास्मदनुजिघृक्षयावधारय ॥

१. 'दैत्यदूती' ख. २. 'त्रिफल' ख.

नाशं नास्मच्चरणशरणा यान्त्यपि ग्रस्यमाना
देवैरित्थं सितमिव यशो दर्शयन्स्वं त्रिलोक्याम् ।
मन्ये सोमं क्षततनुममागर्भवृद्ध्या विवस्व-
ञ्शुक्लच्छायां नयसि शनकैः स्वां सुषुम्णांशुभासा ॥ ४३ ॥

हे भगवन् विवस्वन् चिद्भानो, अस्मच्चरणशरणा देवैरपि ग्रस्यमाना नाशं न यान्ति इत्येवं सितं शुभ्रं यशस्त्रिलोक्यां दर्शयन्निव सोमं क्षततनुं देवैरपि ग्रस्तसमस्तकलं सुषुम्णाख्यमध्यनाड्या अंशवो मरीचयस्तद्भासा दीप्त्या हेतुभूतया अमाख्यकलया गर्भेऽन्तर्या वृद्धिस्तया स्वां शुक्लां छायां संपूर्णसितां कान्तिं नयसि प्रापयसीति मन्ये जानामि । अत्र रहस्यदृशा देवा इन्द्रियाणि सोमोऽपानयुक्त्यान्तः प्रविष्टः षोडशकलारूपात्मा मेयवर्गः सर्वेवाहोल्लासयुक्त्या कलाग्रासेन क्षीणकलः सन्, सुषुम्णांशुभासा मध्यधामस्फारेणोन्मिषच्छुभाख्यतुर्यप्रकाशदीप्त्या अमाया अन्तस्त्रुट्यर्धस्फुरच्छक्तेर्गर्भेऽन्तर्या वृद्धिः प्राणादिप्राधान्यनिमेषोन्मिषच्छाक्तवीर्यभाभिः स्फुरिता तया शुक्लां चिदेकघनां नयसि प्रापयसीत्यर्थः । बाह्यस्तु स्पष्टः ॥

आस्तां जन्मप्रभृति भवतः सेवनं तद्धि लोके
वाच्यं केनापरिमितफलं भुक्तिमुक्तिप्रकारम् ।
ज्योतिर्मात्रं स्मृतिपथमितो जीवितान्तेऽपि भास्व-
न्निर्वाणाय प्रभवसि सतां तेन ते कः समोऽन्यः ॥ ४४ ॥

हे भास्वन्, जन्मप्रभृति यत्त्वत्सेवनं तदपरिमितफलं केन वाच्यं केन वक्तुं शक्यम् । इयत्तया परिच्छेद्यत्वाभावात् । तद्यस्माद्भुक्तिमुक्तिप्रकारं भुक्तिर्विषयभोग एव स्वात्मानन्दविश्रान्तिदत्वेन जीवच्छिवत्वाभिव्यक्तात्मा मुक्तिरेव च चिच्चमत्कारावेशरूपा भुक्तिः । न तु विषयासक्तिरूपा । तां भुक्तिं मुक्तिं प्रकाशयति सेवकांस्तन्मयान्संपादयति जीवितान्ते निर्वाणावसरेऽपि ज्योतिर्मात्रात्मा त्वं सतां स्मृतिपथं प्राप्तो निर्वाणाय मुक्तये प्रभवसि । अतस्ते समः कोऽन्यः । असामान्यमहिमासीत्यर्थः ॥

अप्रत्यक्षत्रिदशभजनाद्यत्परोक्षं फलं त-
त्पुंसां युक्तं भवति हि समं कारणेनैव कार्यम् ।
प्रत्यक्षस्त्वं सकलजगतां यत्समक्षं फलं मे
युष्मद्भक्तेः समुचितमतस्तत्त याचे यथा त्वाम् ॥ ४५ ॥

अप्रत्यक्षेन्द्रचन्द्रादिपरोक्षं कालान्तरे भावि फलं तद्युक्तम् । यतो मृद इव मृण्मयो घटः कारणोचितमेव सर्वत्र कार्यं भवति । त्वं

तु चिदर्कः सर्वेषां प्रत्यक्षः स्वप्रकाशः । चिदर्कस्वप्रकाशात्मतां विना कस्याप्यप्रकाशादिति । त्वद्भक्तेर्हेतोर्मम नित्योदितत्वत्समावेशात्मफलं समुचितम् । अतो हेतोस्तत्फलं याचे प्रार्थये । यथाकृतिमतीषु देवतासु सतीषु त्वामेव याचे तथा निर्व्युत्थानसमावेशात्मैव फलं याचे । न तु मितं किंचित् ॥

ये चारोग्यं दिशति भगवान्सेवितोऽप्येवमाहु-
स्ते तत्त्वज्ञा जगति सुभगा भोगयोगप्रधानाः ।
भुक्तेर्मुक्तेरपि च जगतां यच्च पूर्णं सुखानां
तस्यान्योऽर्कादमृतवपुषः को हि नामास्तु दाता ॥ ४६ ॥

येऽपि च केचिदविमृष्टसमावेशात्मसुख्यफला भगवान्सेवित आरोग्यं दिशतीत्याहुस्तेऽपि जगति तत्त्वज्ञाश्च सुभगाश्च । यतो भोगयोगप्रधाना भोगाय योगाय चारोग्यं वाञ्छन्ति । युक्तं चैतत् । यतोऽमृतवपुषः परानन्दप्रकाशघनाच्चिदर्कादन्यः को नाम भोगमोक्षयोस्तदाश्रयस्य पूर्णसुखात्मन आरोग्यस्य च दाता । न कश्चित् । 'पूरणगुणसुहितार्थ–' इति तृप्त्यर्थैः सह षष्ठीसमासनिषेधाज्ज्ञापकात्सुखानांपूर्णमित्यत्र षष्ठी ॥

हित्वा हित्वा गुरुचपलतामप्यनेकान्निजार्था-
न्यैरेकार्थीकृतमिव भवत्सेवनं मत्प्रियार्थम् ।
तेषामिच्छाम्युपकृतिमहं स्वेन्द्रियाणां प्रियाणा-
मादौ तस्मान्मम दिनपते देहि तेभ्यः प्रसादम् ॥ ४७ ॥

हे दिनपते चिद्भानो, यैरिन्द्रियैरन्तर्बहिःकरणैर्गुर्वीं चपलतां महतीमनवस्थितिं पुनः पुनः प्रवृत्तामपि तथानेकान्निजार्थान्विषयविश्रान्त्यात्मकानि नानास्वप्रयोजनानि हित्वा त्यक्त्वा भवत्सेवनमन्तर्मुखीभावयुक्त्या त्वत्परिशीलनं मम प्रियार्थमेवैकार्थीकृतमभिनिवेशेनाश्रितम् । तेषां प्रियाणां स्वेन्द्रियाणामहमुपकारमिच्छामि । तस्मान्ममादौ तेभ्यः प्रसादं देहि । मायीयदेहपरिहारेण निजमरीचिचक्रात्मतां प्रकटयेत्यर्थः ॥

किं तन्नामोच्चरति वचनं यस्य नोच्चारकस्त्वं
किं तद्वाच्यं सकलवचसां विश्वमूर्ते न यत्त्वम् ।
तस्मादुक्तं यदपि तदपि त्वन्नुतौ भक्तियोगा-
दस्माभिस्तद्भवतु भगवंस्त्वत्प्रसादेन धन्यम् ॥ ४८ ॥

हे विश्वमूर्ते अनवच्छिन्न, त्वन्नुतिविषये इदन्तावच्छेदप्रधानतया असमञ्जसप्रायं किमप्यस्माभिस्त्वद्भक्तित उक्तं तद्विश्वस्य वाच्यवाचकात्मनस्तव प्रसादादन्तर्नैर्मल्यप्राप्तेर्धन्यमस्तु त्वद्रूपतयैव स्फुरतु ॥

१. 'मूलं' ख. २. 'अशेषान्' ख. ३ 'जगत' ख. ४ 'अस्माकं' ख.

या पन्थानं दिशति शिशिराद्युत्तरं देवयानं
या वा कृष्णं पितृपथमथो दक्षिणं प्रावृडाद्यम् ।
ताभ्यामन्या विषुवदभिजिन्मध्यमा कृत्यशून्या
धन्या काचित्प्रकृतिपुरुषावन्तरा मेऽस्तु वृत्तिः ॥ ४९ ॥

प्रकृतिपुरुषौ वामदक्षिणवाहौ अन्तरा तन्मध्ये काचिदसामान्या धन्या संपन्मयी मे वृत्तिः स्थितिरस्तु । कीदृशी । विषुं व्याप्तिमर्हतीति विषुवत् । अभिजयति द्वैतप्रशमनात्सर्वोत्कर्षेण वर्तत इत्यभिजित् । सर्वमध्यवर्तित्वान्मध्यमा । स्वानन्दविश्रान्तिसारत्वात्कृत्यैः सौम्यक्रूरादिभिः कार्यैः शून्या । तथा देवप्रीतिकारित्वाद्देवयानं हृदो द्वादशान्तं यावत्प्रसरणरूपं शिशिरवसन्तग्रीष्मस्वभावमुत्तरपन्थानमुत्तरायणं या प्राणाख्या वृत्तिर्दिशति प्रथयति, या वा अपानाख्या वृत्तिर्द्वादशान्ताद्धृत्प्रवेशरूपा प्रावृट्शरद्धेमन्तरूपं दक्षिणं पन्थानं दक्षिणायनं भोगप्रदत्वात्कृष्णं पितृप्रीतिहेतुत्वात्पितृपथं दिशति ताभ्यामन्या व्यतिरिक्ता जीवन्मुक्तिप्रदा । उन्मनाख्येत्यर्थः । षट्त्रिंशदङ्गुलेऽङ्गुलषट्के हृदः प्रभृति मकरादिराश्युदय इत्यर्थः श्रीस्वच्छन्दादिशास्त्रेष्वस्ति ॥

स्थित्वा किंचिन्मन इव पिबन्सेतुबन्धस्य मध्ये
प्राप्योपेयं ध्रुवपदमथो व्यक्तमुद्घाल्य तालु ।
सत्यादूर्ध्वं किमपि परमं व्योम सोमाग्निशून्यं
गच्छेयं त्वां सुरपितृगती चान्तरा[1] ब्रह्मभूतः ॥ ५० ॥

सुरपितृगती अन्तरा ऊर्ध्वाधःप्रवेशात्मनिर्णीतदेवपितृमार्गयोर्मध्ये चकारात्सर्ववाहानामप्यन्तर्ब्रह्मभूतोऽनवच्छिन्नतां प्राप्तस्त्वां गच्छेयं परतत्त्वात्मचिदर्करूपः स्याम् । कीदृशं त्वाम् । सत्याद्विश्वसत्ताप्रदात्सामरस्याद्धाम्न ऊर्ध्वमुत्कृष्टं प्रकाशानन्दैकघनं किमपि परमं व्योमेत्यनुत्तरचिदाकाशरूपं सोमाग्निशून्यं प्रशान्तप्राणापानसंस्कारम् । किं कृत्वा । तालुलम्बिकाख्यरौद्रग्रन्थिधामव्यक्तिं कृत्वा । दिव्यकरणबन्धाश्रयत उद्घाल्य निर्भिद्य । अथो अनन्तरं ध्रुवपदं प्राप्य समस्तवेद्याविभागप्रकाशात्मविन्दुस्थानमासाद्य । सेतुबन्धस्य मध्य इति निरोधकोर्ध्वशक्त्या तटद्वयान्तर्बाहिप्राणापानाद्युत्तरणोपायनादनादात्मसृष्टिनिरुद्धसमस्तकरन्ध्रमार्गे स्थित्वाधिरुह्य किंचिन्मनः पिबन्निव समनान्तसविकल्पकमनःसंस्कारं प्रशमयन् ॥

सर्वात्मत्वं सवितुरिति यो वाङ्मनःकायबुद्ध्या
रागद्वेषोपशमसमतायोगमेवाश्रयः ।

१. 'त्वन्तरा' ख.

धर्माधर्मग्रसनरशनामुक्तये युक्तियुक्तां

स श्रीसाम्बः स्तुतिमिति रवेः स्वप्रशान्तां चकार ॥ ५१ ॥

श्रयन्त्येतां योगिन इति श्रीस्तया मोक्षलक्ष्म्या सहितः साम्बो भगवद्वासुदेवसुत इत्येवंरूपां रवेश्चिदर्कस्य स्तुतिं स्वप्रशान्तामात्मविश्रान्तिपरामकरोत् । 'सुप्रतिष्ठां' इति वा पाठः । कीदृशीं स्तुतिम् । युक्त्या परस्वरूपविश्रान्त्यात्मना योगेन युक्ताम् । तत्त्व्यापयित्रीमित्यर्थः । स इत्यस्य विषयं दर्शयति—यः सवितुर्विश्वकारणस्य चिद्भानोः सर्वात्मत्वं वैश्वरूप्यमेव योगमेकत्वमिच्छति । 'वस्तुनोऽन्येन वस्तुना' इत्याम्नायदृशा योगं परैक्यमित्युक्तदृशारोढुमिच्छुः स्वीचिकीर्षुः । न त्वन्यत्किंचित् । कीदृशं योगम् । सर्वदोषमूर्धन्ययो रागद्वेषयोरुपशमे सति या समता साम्यं तद्रूपम् । केन । वाङ्मनःकायसहितया बुद्ध्याध्यवसायेन । किमर्थमिमां स्तुतिमकरोदित्याह—धर्माधर्माभ्यां यद्ग्रसनमर्थादबुद्धस्य जगतस्तदेव रशना बन्धनरज्जुस्तस्या मुक्तये । एतत्स्तोत्रपाठावमर्शाभ्यां जना जीवन्मुक्तिमायान्त्वित्याशयादित्यर्थः ॥

भक्तिश्रद्धाद्यखिलतरुणीवल्लभेनेदमुक्तं

श्रीसाम्बेन प्रकटगहनं स्तोत्रमध्यात्मगर्भम् ।

यः सावित्रं पठति नियतं स्वात्मवत्सर्वलोका-

न्पश्यन्सोऽन्ते व्रजति शुकवन्मण्डलं चण्डरश्मेः ॥ ५२ ॥

इदमध्यात्मगर्भं क्रोडीकृतरहस्यम्, प्रकटं बाह्यार्थदृशा, गहनं चाध्यात्मकार्थयोगात्, सावित्रं चिद्भानुसंबन्धि स्तोत्रं श्रीसाम्बेनोक्तं यः कश्चित्स्वात्मानमिव सर्वलोकान्पश्यंश्चिदभेदात्मविश्वं स्तोत्रार्थं भावयन्नियतं निश्चयेन पठति अनवरतं विशशति, सोऽन्ते चण्डरश्मेर्द्वैतग्रासिनश्चिदर्कस्य मण्डलं लीढविश्वसमरसीभूतमरीचिचक्रमेति । तन्मयो जायते । शुकवद्भगवद्व्याससुतवत् । कीदृशेन साम्बेन । भक्तिश्रद्धे आदी यासां तत्त्वार्थचिन्तादीनां ता एवाखिलास्तरुण्यो नवनवाः सुन्दर्यस्तासां वल्लभेन क्षणमपि परिहर्तुमशक्येन प्रेयसा । न तु रूपलावण्यातिशयमात्रात्समस्तबाह्यरमणीस्पृहणीयेन । इत्यनेन व्यतिरेकलभ्येनार्थेन भगवद्वासुदेवसुतत्वमात्मनः प्रकटयति ॥

उपसंहारभङ्ग्या जनाननुजिघृक्षुराशास्ते—

इति परमरहस्यश्लोकपञ्चाशदेषा[2]

तपननवनपुण्या[3] सागमब्रह्मचर्चा ।

हरतु दुरितमस्वद्वर्णिताकर्णिता वो

दिशतु च शुभसिद्धिं[4] मातृवद्भक्तिभाजाम् ॥ ५३ ॥

१. 'रसना' ख. २. 'पञ्चाशिकैषा' क. ३ 'जपन' ख. ४ 'सुखसिद्धिं' ख.

इत्युक्तक्रमान्महारहस्यार्थयुक्ता 'स्थित्वा किंचिन्मन इव पिबन्' इत्यन्तश्लोकानां पञ्चाशदेषा तपनस्य विश्वविचित्राखण्डितप्रतापस्य भगवतश्चिदर्कस्य नवनेन स्तुत्या पुण्या पवित्रा । तथा सागमा विश्वोपनिषद्रूपमाहेश्वरशास्त्रार्थसतत्त्वगर्भा ब्रह्मचर्चा पराद्वयविमर्शो यस्यां तादृशी अस्मद्वर्णिता सती आकर्णिता वो युष्माकं सर्वेषां दुरितं हरतु किल्बिषं दुरध्यवसायं च नाशयतु । भक्तिभाजां च शुभसिद्धिं दिशतु अभीष्टां भोगमोक्षलक्ष्मीं घटयतामिति शिवम् ॥

कश्चिच्छैवः परशिवसमावेशगाढानुरागो-
द्रेकस्फूर्जन्नभिनवदशावेशवैवश्यशाली ।
सत्स्तोत्रेऽस्मिन्विवृतिरचनां क्षेमराजो न्ययुङ्क्ते-
त्येतन्नैवं झटिति घटितं दर्शनीयं हि सद्भिः ॥

इति महामाहेश्वराचार्यवर्यश्रीमदभिनवगुप्तपादपद्मोपजीविराजानकश्रीक्षेमराजप्रणीत-विवृतिसमेता श्रीसाम्बपञ्चाशिका समाप्ता ।

समाप्तोऽयं ग्रन्थः ।

धर्माधर्मग्रसनरशनामुक्तये युक्तियुक्तां

स श्रीसाम्बः स्तुतिमिति रवेः स्वप्रशान्तां चकार ॥ ५१ ॥

श्रयन्त्येतां योगिन इति श्रीस्तया मोक्षलक्ष्म्या सहितः साम्बो भगवद्वासुदेवसुत इत्येवंरूपां रवेश्चिदर्कस्य स्तुतिं स्वप्रशान्तामात्मविश्रान्तिपरामकरोत् । 'सुप्रतिष्ठां' इति वा पाठः । कीदृशीं स्तुतिम् । युक्त्या परस्वरूपविश्रान्त्यात्मना योगेन युक्ताम् । तत्त्व्यापयित्रीमित्यर्थः । स इत्यस्य विषयं दर्शयति—यः सवितुर्विश्वकारणस्य चिद्भानोः सर्वात्मत्वं वैश्वरूप्यमेव योगमेकत्वमिच्छति । 'वस्तुनोऽन्येन वस्तुना' इत्याम्नायदृशा योगं परैक्यमित्युक्तदृशारोढुमिच्छुः स्वीचिकीर्षुः । न त्वन्यत्किंचित् । कीदृशं योगम् । सर्वदोषमूर्धन्ययो रागद्वेषयोरुपशमे सति या समता साम्यं तद्रूपम् । केन । वाङ्मनःकायसहितया बुद्ध्याध्यवसायेन । किमर्थमिमां स्तुतिमकरोदित्याह—धर्माधर्माभ्यां यद्ग्रसनमर्थादबुद्धस्य जगतस्तदेव रशना बन्धनरज्जुस्तस्या मुक्तये । एतत्स्तोत्रपाठावमर्शाभ्यां जना जीवन्मुक्तिमायान्त्वित्याशयादित्यर्थः ॥

भक्तिश्रद्धाद्यखिलतरुणीवल्लभेनेदमुक्तं

श्रीसाम्बेन प्रकटगहनं स्तोत्रमध्यात्मगर्भम् ।

यः सावित्रं पठति नियतं स्वात्मवत्सर्वलोका-

न्पश्यन्सोऽन्ते व्रजति शुकवन्मण्डलं चण्डरश्मेः ॥ ५२ ॥

इदमध्यात्मगर्भं क्रोडीकृतरहस्यम्, प्रकटं बाह्यार्थदृशा, गहनं चाध्यात्मकार्थयोगात्, सावित्रं चिद्भानुसंबन्धि स्तोत्रं श्रीसाम्बेनोक्तं यः कश्चित्स्वात्मानमिव सर्वलोकान्पश्यंश्चिदभेदात्मविश्वं स्तोत्रार्थं भावयन्नियतं निश्चयेन पठति अनवरतं विशशति, सोऽन्ते चण्डरश्मेर्द्वैतग्रासिनश्चिदर्कस्य मण्डलं लीढविश्वसमरसीभूतमरीचिचक्रमेति । तन्मयो जायते । शुकवद्भगवद्व्याससुतवत् । कीदृशेन साम्बेन । भक्तिश्रद्धे आदी यासां तत्त्वार्थचिन्तादीनां ता एवाखिलास्तरुण्यो नवनवाः सुन्दर्यस्तासां वल्लभेन क्षणमपि परिहर्तुमशक्येन प्रेयसा । न तु रूपलावण्यातिशयमात्रात्समस्तबाह्यरमणीस्पृहणीयेन । इत्यनेन व्यतिरेकलभ्येनार्थेन भगवद्वासुदेवसुतत्वमात्मनः प्रकटयति ॥

उपसंहारभङ्ग्या जनाननुजिघृक्षुराशास्ते—

इति परमरहस्यश्लोकपञ्चाशदेषा[2]

तपनन[3]वनपुण्या सागमब्रह्मचर्चा ।

हरतु दुरितमसद्वर्णिताकर्णिता वो

दिशतु च शु[4]भसिद्धिं मातृवद्भक्तिभाजाम् ॥ ५३ ॥

१. 'रसना' ख. २. 'पञ्चाशिकैषा' क. ३ 'जपन' ख. ४ 'सुखसिद्धिं' ख.

इत्युक्तक्रमान्महारहस्यार्थयुक्ता 'स्थित्वा किंचिन्मन इव पिबन्' इत्यन्तश्लोकानां पञ्चाशदेषा तपनस्य विश्वविचित्राखण्डितप्रतापस्य भगवतश्चिदर्कस्य नवनेन स्तुत्या पुण्या पवित्रा । तथा सागमा विश्वोपनिषद्रूपमाहेश्वरशास्त्रार्थसतत्त्वगर्भा ब्रह्मचर्चा पराद्वयविमर्शो यस्यां तादृशी अस्मद्वर्णिता सती आकर्णिता वो युष्माकं सर्वेषां दुरितं हरतु किल्बिषं दुरध्यवसायं च नाशयतु । भक्तिभाजां च शुभसिद्धिं दिशतु अभीष्टां भोगमोक्षलक्ष्मीं घटयतामिति शिवम् ॥

कश्चिच्छैवः परशिवसमावेशगाढानुरागो-
द्रेकस्फूर्जन्नभिनवदशावेशवैवश्यशाली ।
सत्स्तोत्रेऽस्मिन्विवृतिरचनां क्षेमराजो न्ययुङ्क्त-
स्तेनैवं झटिति घटितं दर्शनीयं हि सद्भिः ॥

इति महामाहेश्वराचार्यवर्यश्रीमदभिनवगुप्तपादपद्मोपजीविराजानकश्रीक्षेमराजप्रणीतविवृतिसमेता श्रीसाम्बपञ्चाशिका समाप्ता ।

समाप्तोऽयं ग्रन्थः ।